CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४३२

वैयाकरण

सिद्धान्त कौमुदी रहस्यम्

[सोत्तरा—प्रश्नावली]

सिद्ध-प्रयोग-सूचि सहितम्

[चतुर्थ खण्ड]

सम्पादकः

पं० श्रीचन्द्रधर शुक्ल

व्याकरण विभागाध्यक्ष

राजगोपाल संस्कृत महाविद्यालय,

अयोध्या

प्रकाशकः

भारतीय विद्या प्रकाशन

वाराणसी दिल्ली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैयाकरण

सिद्धान्तकौमुदी-रहस्यम्

(सोत्तरा-प्रश्नावली-चतुर्थखण्डम्)

(प्रश्नोत्तरीरूपः)

सिद्धप्रयोगसूची सहितः



लेखकः

पण्डित श्रीचन्द्रधरशुक्लः

(व्याकरण-विभागाध्यक्षः)

राजगोपाल संस्कृत महाविद्यालयः

अयोध्या, फैजाबाद

सम्पादकः

पण्डित श्रीरविशङ्करशुक्लः

(व्याकरणशास्त्री)

भारतीय विद्या प्रकाशन

वाराणसी ❀ दिल्ली

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकाशक :

© भारतीय विद्या प्रकाशन

पो० बा० नं० ११०८, कचौड़ी गली, वाराणसी-२२१००१, फोन नं० ६५९६५

१, यू० बी० जवाहर नगर, बँग्लो रोड, दिल्ली-११०००७, फोन-२५२१५७०

U91.25
GHW

अन्य प्राप्ति स्थान :-

भारतीय बुक कारपोरेशन

१, यू० बी०, जवाहर नगर, बँग्लो रोड, दिल्ली-११०००७

मूल्य-१५/-

प्रथम संस्करण-मार्च १९८८

१९८९९९

मुद्रक :

गिरजा प्रिन्टिंग प्रेस

वाराणसी

Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

दो शब्द

यह परम हर्ष है कि मर्यादापुरुषोत्तम भगवान् रामचन्द्र के अनुग्रह से मैंने सिद्धान्तकौमुदी चतुर्थ खण्ड के प्रयोगों की भी सिद्धि कर दी। छात्रों की सुविधा के सन् निर्देश के साथ सिद्धप्रयोगों की सूची भी जोड़ दी। इससे अध्ययनशील छात्रों को विशेष सुविधा होगी।

इस ग्रन्थ का प्रकाशन भारतीय विद्या प्रकाशन ने करके संस्कृत विद्या के प्रचार में जो योगदान किया उसके लिए उन्हें साधुवाद देता हूँ। इसके सम्पादन का कार्य मेरे ज्येष्ठ पुत्र चि० रविशङ्कर शुक्ल व्याकरणाचार्य ने करके मेरे कार्य में सहायता की, इसके लिए आशीर्वाद देता हूँ।

अन्त में भगवान् के कर-कमलों में पुष्प रूप से अर्पण करता हुआ विज्ञजनों को अर्पित करता हूँ। आशा है यह छात्रों के लिए सन्तोषदायक होगा।

शिवरात्रि
२०४४ 'विक्रम'

चन्द्रधरशुक्ल
(व्याकरण विभागाध्यक्ष)
राजगोपाल संस्कृत महाविद्यालय
(अयोध्या)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रकरण-सूची

दिवादिप्रकरणम्	....	....	१
स्वादिप्रकरणम्	....	....	८
तुदादिप्रकरणम्	....	....	१२
रुधादिप्रकरणम्	....	....	१६
तनादिप्रकरणम्	....	....	२१
क्र्यादिप्रकरणम्	....	....	२६
चुरादिप्रकरणम्	....	....	३०
ण्यन्तप्रकरणम्	....	....	३६
सन्नन्तप्रकरणम्	....	....	४६
यङन्तप्रकरणम्	....	....	६०
यङ्लुगन्तप्रकरणम्	....	....	६५
नामधातुप्रकरणम्	....	....	७४
कण्ड्वादिप्रकरणम्	....	....	८८
प्रत्ययमालाप्रकरणम्	....	....	९०
आत्मनेपदप्रकरणम्	....	....	९२
परस्मैपदप्रकरणम्	....	....	१०६
भावकर्मप्रकरणम्	....	....	११०
कर्मकर्तृप्रकरणम्	....	....	१२०
लकारार्थप्रकरणम्	....	....	१२७
कृत्यप्रकरणम्	....	....	१३४
पूर्वकृदन्तप्रकरणम्	....	....	१४७
उत्तरकृदन्तप्रकरणम्	....	....	१८६
सिद्धप्रयोगसूची	....	....	२११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैयाकरण
सिद्धान्तकौमुदी-रहस्यम्
चतुर्थखण्डम्
अथ दिवादिप्रकरणम्

यं नत्वा परमात्मानं स्वात्मानं सर्वदेहिनाम्।
शिला वाचालतां प्राप्ता रामं तमहमाश्रये॥

दिवु क्रीडादिषु—अत्र धातौ उदित्करणं क्त्वायामिड्विकल्पार्थं निष्ठायामनिडर्थं च। क्रीडायाम्, विजिगीषायाम् व्यवहारे, द्युतौ=प्रकाशे, स्तुतौ=प्रशंसायाम्, मोदे=हर्षे, मदे=गर्वे, स्वप्ने, कान्तौ=इच्छायाम्, गतौ=चलने, चार्थे दिववातुः प्रयुज्यते। अत्र कान्तिः न प्रकाशरूपः किन्तु इच्छारूपः द्युतेः पृथग्ग्रहणात्।

दीव्यति (ई० ६६)—दिवधातोर्लटि तिपि सार्वधातुकत्वे शपि प्राप्ते तं प्रबाध्य 'दिवादिभ्यः श्यन्' इति श्यनि अनुबन्धलोपे 'हलि चे'ति दीर्घे दीव्यति इति सिद्धम्।

परिषीव्यति (ई० ७६)—पर्युपपदात् दिवु धातोर्लटि तिपि प्राप्तं शपं प्रबाध्य श्यनि 'हलि चे'ति दीर्घे 'परिनिविभ्यः सेवसिच्' इति षत्वे परिषीव्यति इति सिद्धम्।

न च 'स्थादिष्वभ्यासेन चाभ्यासस्ये'ति सूत्रे एषामेव चाभ्यासस्य, न तु सुनोत्यादीनाम् इति नियमेन षत्वं न स्यादिति वाच्यम्, तत्र प्राक्सितात् इत्यस्यानुवृत्त्या सिवुधातोः प्राक्सितीयत्वाभावात् षत्वम्।

नर्तिष्यति (ई० ७४)—नृत् धातोर्लृटि तिपि श्यनं प्रबाध्य 'स्यतासीलृलुटोः' इति स्यप्रत्यये तस्यार्धधातुकत्वेन 'सेऽसिचिकृतच्छृततृदनृतः' इति विकल्पेन इटि अनुबन्धलोपे 'पुगन्ते'ति गुणे रपरत्वे 'आदेशप्रत्यययोः' इति षत्वे नर्तिष्यति इति। इटोऽभावे नर्त्स्यति इति भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्रेसतुः (ई० ७८)—त्रस् धातोर्लिटि तसि अतुसि द्वित्वे अभ्यासत्वे प्राप्तं हलादिः शेषं प्रबाध्य 'वा जृभ्रमुत्रसाम्' इति एत्वे अभ्यासलोपे च कृते रुत्वे विसर्गे त्रेसतुः इति सिद्धम् ।

सुषुविषे (ई० ७७)—षू धातोः 'धात्वादेः षः सः' इति सत्वे लिटि तस्य स्थाने थासि 'थासः से' इति सेभावे द्वित्वे अभ्याससंज्ञायाम् ह्रस्वे 'आर्धधातुकस्येड्वलादेः' इति इटि प्राप्ते तं परत्वात् प्रबाध्य 'स्वरतिसूति'—इति विकल्पेन इटि प्राप्ते परमपि इटं प्रबाध्य 'श्रुकः किति' इति निषेधे क्रादिनियमात् नित्यमिटि 'आदेशप्रत्यययोः' इत्यनेन इणः परयोः धातुप्रत्ययसकारयोः षत्वे 'अचि श्नुधातु' इति उवङि सुषुविषे इति सिद्धम् ।

दीयते (ई० ७८)—दीङ्धातोर्लटि ङित्वादात्मनेपदत्वेन तप्रत्यये प्राप्तं शपं 'प्रबाध्य दिवादिभ्यः श्यन्' इति श्यनि 'टित आत्मनेपदानां टेरे' इति टेः एत्वे दीयते इति सिद्धम् ।

दीदीये (ई० ६२)—दीङ धातोरात्मनेपदे लिटि तप्रत्यये 'लिटस्तझयोरेशिरेच्' इति एशादेशे द्वित्वे अभ्यासत्वे ह्रस्वे दि दी ए इति स्थिते 'दीङो युडचि किङिति' इति युडागमे अनुबन्धलोपे दिदीये इति सिद्धम् । न च आभीयत्वेन युटोऽसिद्धत्वात् 'एरनेकाच' इति यण् स्यादिति वाच्यम्, 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकेन युटः सिद्धत्वज्ञापनात् ।

अदास्त (ई० ८४)—दीङ् धातोर्लुङि अटि लुङः तप्रत्यये शपं प्रबाध्य च्लौ सिचि 'मीनातिमिनोतिदीङां ल्यपि च' इति आत्वे अदास्त इति सिद्धम् ।

न च दीङः आत्वे कृते दारूपत्वात् 'दाधाध्वदाप्' इति घुत्वे 'स्थाध्वोरिच्चे'ति इत्वं कुतो नेति वाच्यम्, 'स्थाध्वोरित्वे दीङः प्रतिषेध' इति वार्तिकेन तन्निषेधात् ।

वस्तुतस्तु—आदेच उपदेशे इति विहितस्य आत्वस्य दो अवखण्डने इत्यादावनुकरणे दारूपस्य लाभेऽपि एजूनिमित्तकस्य दीङः आत्वस्य निमित्ताभावेऽनुकरणे दारूपासम्भवेन घुत्वाभावात् । अत एव प्रनिदाता इत्यत्र 'नेर्गदे'ति णत्वम् न ।

दिध्ये (ई० ६६)—धी धातोर्लिटि तप्रत्यये द्वित्वे अभ्यासत्वे ह्रस्वत्वे 'अभ्यासे चर्च' इति जश्त्वेन दकारे तकारस्य एशि अनुबन्धलोपे यणि दिध्ये इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अमास्त (ई० ७०)—मीङ् धातोर्लुङि अडागमे तप्रत्यये श्यनं प्रवाध्य च्लौ सिचि 'मीनातिमिनोतिदीङां ल्यपि च' इति आत्वे अमास्त इति सिद्धम् ।

लाता (ई० ७४)—श्लेषणेऽर्थे ली धातोर्लुटि तप्रत्यये शपं प्रवाध्य तासि डादेशे डित्वसामर्थ्यादमस्यापि टेर्लोपे 'विभाषा लीयते' इति विकल्पेन आत्वे लाता इति । पक्षे 'सार्वधातुकार्धधातुकयोः' इति गुणे लेता इति सिद्धचति ।

अयाञ्चक्रे (ई० ७१)—'इङ्' धातोर्लिटि 'इजादेश्च गुरुमतोऽनृच्छः' इत्यनेन आमि गुणे अयादेशे लिटो लुकि 'कृञ्चानुप्रयुज्यते लिटि' इति लिट्परककृञोऽनुप्रयोगे लिटः स्थाने तप्रत्यये तस्य एशादेशे द्वित्वे अभ्यासत्वे 'उरत्' इत्यत्वे रपरत्वे हलादिः शेषे चुत्वे यणि आमः कृदन्तत्वेन 'कृन्मेजन्तः' इति अव्ययत्वात् सुपो लुकि पदान्तत्वेन अनुस्वारे परसवर्णे च कृते अयाञ्चक्रे इति सिद्धम् ।

अशात् (ई० ७७)—शो धातोर्लुङि तिपि 'लुङ्लङ्' इत्यडागमे च्लौ तस्य सिचि 'विभाषा घ्राधेट्शाच्छासः' इति सिचो लुकि 'आदेच उपदेशेऽशिति' इत्यात्वे 'इतश्च' इति तिप इकारलोपे 'अशात्' इति । सिज्लोपाभावपक्षे आत्वे कृते आदन्तत्वात् 'यमरमनमातां सक् च' इति इटि सकि च कृते 'अस्तिसिचोऽपृक्ते' इति ईटि 'इट ईटि' सलोपे सवर्णदीर्घे अशासीत् इति सिद्धम् ।

अभ्यष्यत् (ई० ६८)—अभ्युपसर्गात् 'षो अन्तकर्मणि' इत्यस्माद्धातोः 'धात्वादेः षः सः' इति सत्वे लङि अडागमे तिपि दिवादिभ्यः श्यनि' 'ओतः श्यनि 'इत्योकारस्य लोपे' 'प्राक्सितादड्व्यवायेऽपि' इति नियमात् 'उपसर्गात्सुनोति' षत्वे यणि अभ्यष्यत् सिद्धम् इति ।

जायते (ई० ७०)—जन धातोर्लटि आत्मनेपदे तप्रत्यये 'दिवादिभ्यः श्यन्' इति श्यनि 'ज्ञाजनोर्जा' इति जादेशे 'टित आत्मनेपदानां टेरे' इति टेरेत्वे जायते इति सिद्धम् ।

अजनि (ई० ७८)—'जन' धातोर्लुङस्तादेशे 'लुङ् लङ्'—इत्यडागमे च्लौ 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति विभाषया च्लेश्चिणि अनुवन्धलोपे 'अजन् इत' इति स्थिते 'अत उपधायाः' इति वृद्धौ प्राप्तायां जनिवध्योश्च' इति निषेधे 'चिणो लुक्' इति तलोपे अजनि इति । चिणोऽभावपक्षे च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति सिचः इटि षत्वे ष्टुत्वे अजनिष्ट इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अदीपि (ई० ६५)—दीप धातोर्लुङस्तादेशे 'लुङ् लङ्'–इत्यडागमे च्लौ 'दीपजनबुध–' इति च्लेश्चिणि अनुवन्धलोपे 'चिणो लुक्' इति चिणः परस्य तशब्दस्य लोपे अदीपि इति। चिणभावपक्षे च्लेः सिचि इटि षत्वे ष्टुत्वे अदीपिष्ट इति च सिद्धम्।

अपूरि (ई० ७१)—'पूर' धातोर्लुङस्तादेशे 'लुङ्लङ्–' इत्यडागमे च्लौ 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतस्याम्' इति च्लेश्चिणि 'चिणो लुक्' इति तशब्दस्य लोपे अपूरि इति। पक्षे 'च्लेः सिचि' इटि षत्वे ष्टुत्वे अपूरिष्ट इति सिद्धम्।

नेहिथ, ननद्ध (ई० ७३)—णह धातोः 'णो नः' इति धातोर्णस्य नत्वे लिटि लिटः सिपि सिपस्थलि 'लिटि धातोः–' इति द्वित्वे अभ्यासत्वे हलादिः शेषे 'ऋतो भारद्वाजस्य' इति इटि 'थलि च सेट्' इति एत्वाभ्यासलोपयोः कृतयोः 'नेहिथ' इति। इडभावपक्षे 'नहो धः' इति हस्य धत्वे 'झषस्तथोर्धो धः' इति थस्य धत्वे 'झलां जश् झशि' इति पूर्वधकारस्य दकारे ननद्ध इति सिद्धम्।

प्रण्यपादि (ई० ६८)—प्र नि इत्युपसर्गात् पद धातोर्लुङि अडागमे तादेशे च्लौ 'चिण् ते पदः' इति च्लेश्चिणि 'चिणो लुक्' इति तलोपे 'अत उपधायाः' इति वृद्धौ यणि णत्वे 'प्रण्यपादि' इति सिद्धम्।

कथं युध्यति—ननु युध धातोरात्मनेपदत्वात् युध्यति इति न सिद्ध्येत् इति चेन्न युधमिच्छति इत्यर्थे क्यचि रूपसिद्धेः। अथवा अनुदात्तेत्वलक्षणमात्मनेपदमनित्यमिति सिद्धान्ते परस्मैपदत्वमपि।

अबोधि, अबुद्ध (ई० ७४)—बुध्धातोर्लुङि 'लुङ् लङ्–' इत्यडागमे तादेशे च्लौ 'दीपजनबुध–' इति च्लेश्चिणि 'चिणो लुक्' इति तकारस्य लोपे 'पुगन्तलघूपधस्य च' इति गुणे अबोधि इति। चिणभावपक्षे च्लेः सिचि 'झलो झलि' इति सलोपे 'झषस्तथोर्धो धः' इति तस्य धत्वे 'झलां जश् जशि' इति धस्य जश्त्वेन दकारे अबुद्ध इति सिद्धम्।

स्रष्टा (ई० ६४)—सृज् धातोर्लुटस्तादेशे शपं प्रबाध्य 'स्यतासी लृलुटोः' इति तासि तकारस्य डादेशे डित्त्वसामर्थ्यादभस्यापि टेर्लोपे 'सृजदृशोर्झल्यमकिति' इत्यमि यणि 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे ष्टुत्वे स्रष्टा इति सिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सृक्षीष्ट (ई० ६६)—'सृज विसर्गे' इति धातोराशीर्लिङि तत्स्थाने आत्मनेपत प्रत्यये 'लिङः सीयुट्' इति सीयुडागमे 'सुट् तिथोः' इति सुटि लिङ्, सिचावात्मनेपदेषु' इति कित्त्वाद् गुणाभावे 'सृजदृशोर्झल्यमकिति' इति अमोऽभावे च यकारस्य लोपे 'व्रश्चभ्रस्ज–' इति जस्य षत्वे षस्य कत्वे 'आदेशप्रत्यययोः' इति षत्वे ष्टुत्वे सृक्षीष्ट इति सिद्धम् ।

असृष्ट (ई० ७४)—सृजधातोर्लुङि 'लुङ्लङ्–' इत्यडागमे तादेशे च्लौ च्लेः सिचि 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वात् गुणाभावे 'सृजदृशो' रित्यमोऽप्राप्तौ 'झलो झलि' इति सलोपे 'व्रश्चभ्रस्ज–' इति षत्वे ष्टुत्वे असृष्ट इति सिद्धम् ।

राधोऽकर्मकादेव श्यन् (ई० ७८)—राधोऽकर्मकाद् वृद्धावेवेति मूले पाठः । तत्र राधेरर्थान्तरेऽपि श्यन्नुपपत्तये एवकारस्य भिन्नकर्मत्वमवश्यं स्वीकार्यम् । राधो वृद्धावेव श्यन् इति तु न वृद्धावस्याकर्मकत्वेन अकर्मकग्रहणवैयर्थ्यात् । एवं सति वृद्धावित्यस्य अकर्मकक्रियामात्रोपलक्षणार्थत्वम्, न तु परिसंख्यानार्थत्वम् । यथा—'यन्मह्यमपराध्यति' द्रुह्यतीत्यर्थः 'विराध्यन्तं क्षमेत कः' द्रुह्यन्तमित्यर्थः ।

रराधतुः (ई० ७७)–राध्धातोर्लिटि तसोऽतुसि द्वित्वे अभ्यासत्वे हलादिः शेषे ह्रस्वे सस्य रुत्वे विसर्गे रराधतुः इति । नचात्र 'राधो हिंसायाम्' इति एत्वाभ्यासलोपौ कथन्नेति वाच्यम्, तत्र हिंसार्थकस्य सकर्मकस्यैव ग्रहणाद्, अत्राकर्मके दैवादिकेऽस्याप्रसक्तेः ।

रराधिथ (ई० ७५)—राधधातोर्लिटि सिपि तस्य 'परस्मैपदानामि' ति थलादेशे 'लिटि धातोः–' इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'आर्धधातुकस्येड्वलादेः' इति इटि रराधिथ इति । नच 'राधो हिंसायाम्' इत्यनेन एत्वाभ्यासलोपौ कुतो न भवतः इति वाच्यम्, हिंसार्थकस्य सकर्मकत्वेऽपि अत्र वृद्ध्यर्थकत्वेनाऽकर्मकत्वात् ।

विध्यति (ई० ७०)—व्यध् धातोर्लटि तिपि 'दिवादिभ्यः श्यन्' इति श्यनि, श्यनः पिद्भिन्नत्वेन ङित्वात् 'ग्रहिज्ये' ति सम्प्रसारणे पूर्वरूपे विध्यति इति सिद्धम् ।

अश्लिक्षत् (ई० ७९)—श्लिष् 'आलिङ्गने' इति धातोर्लुङि अडागमे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तिपि च्लौ तस्य 'पुषादिद्युताद्यृदितः परस्मैपदेषु' इति प्राप्तमङं बाधित्वा 'श्लिषः' इत्यनेन क्सादेशे 'पढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति सस्य षत्वे 'अश्लिक्षत्' इति ।

नच श्लिष्वातोः कर्मणि लुङि च्लौ प्राप्तं 'चिण्भावकर्मणोः' इति च्लेश्चिण-मेव अयं क्सादेशो बाधते नतु 'पुषादिद्युतादी'त्यादि सूत्रमिति वाच्यम्, 'पुरस्ता-दपवादा अनन्तरान् विधीन् बाधन्ते नोत्तरान्' इति न्यायेन 'पुषादी' त्यस्यैवाप-वादत्वात् । नच 'शल इगुपधादनिटः क्सः' इत्यनेनैव क्सादेशे सिद्धे 'श्लिष' इति क्सादेशविधानं व्यर्थमिति वाच्यम्, योगविभागसामर्थ्येन 'आलिङ्गने' एव क्सः इति नियमनात् । तेन अनालिङ्गने 'समश्लिषज्जतु काष्ठम्' इत्यत्र न 'शल इगुपधा' इत्यनेनापि क्सः इति ।

ररन्धतुः (ई० ७५)—रध धातोर्लिटि तसि तसोऽनुसि लिटि धातोः—इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'ररधतुस्' इति स्थिते एत्वाभ्यासलोपौ बाधित्वा 'रधिजभोरचि' इति परत्वान्नुमि संयोगात्परत्वेन अकित्त्वान्नलोपा-भावे तस्य रुत्वे विसर्गे ररन्धतुः इति सिद्धम् ।

ररन्धिव (ई० ६४)—रध्धातोर्लिटि वसि वसः 'परस्मैपदानां णलि'ति वादेशे द्वित्वे अभ्यासत्वे हलादिः शेषे 'रधिजभोरचि' इति नुमि 'रधादिभ्यश्च' इति विभाषया इटि 'ररन्धिव' इति । पक्षे एत्वाभ्यासलोपयोः कृतयोः रेष्व इति सिद्धम् ।

रधिता (ई० ६६)—'रध्' धातोर्लिटि तिपि तिपो डादेशे डित्त्वासाम-र्थ्यादमस्यापि टेर्लोपे तसि प्रत्यये 'रधादिभ्यश्च' इति विभाषया इटि 'रधिज-भोरचि' इति नुम्प्राप्ते 'नेटयलिटि रधेः' इति इडभावपक्षे रद्धा इति सिद्धम् ।

अरधत् (ई० ७०)—रध्धातोर्लुङि तिपि अडागमे च्लौ 'पुषादिद्युताद्य-र्दितः परस्मैपदेषु' इत्यनेन च्लेरङि 'रधिजभोरचि' इति नुमि 'अनिदिताम्—' इति नलोपे 'अरधत्' इति सिद्धम् ।

नेशिथ, ननंष्ठ (ई० ७३)—णश्धातो 'णो नः' इति धातोर्णस्य नत्वे लिटि थलि 'रधादिभ्यश्च' इति वेटि 'लिटि धातोः—' इति द्वित्वे अभ्यासत्वे 'थलि च सेटि' इत्येत्वे अभ्यासलोपे च कृते 'नेशिथ' इति । इडभावपक्षे 'ननश्थ' इति स्थिते 'मस्जिनशोर्झलि' इति नुमि 'ब्रश्चभ्रस्ज' इति शस्य षटुत्वे नस्यानु-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वारे 'ननंष्ठ' इति । नच 'नशेर्वा' इति कुत्वमिह कुतो नेति वाच्यम्, पदान्त एव तद्विधानेनात्राप्राप्तेः ।

तृप प्रीणने (ई० ६२)—अत्र प्रीणनं तृप्तिः तर्पणं च, आद्येऽकर्मकः, द्वितीये सकर्मकः, नाग्निस्तृप्यति काष्ठानाम्, पितॄनतार्प्सीत् इत्युभयथा दर्शनात्।

अतार्प्सीत्, अतृपत्, अतर्पीत् (ई० ७१)—तृप्धातोर्लङि अडागमे तिपि च्लौ 'स्पृशमृशकृषतृप' इति विभाषया च्लेः सिचि सस्य 'रधादिभ्यश्च' इति इटि 'अस्तिसिचोऽपृक्ते' इति ईटि 'इट ईटि' इति सलोपे सवर्णदीर्घे नेटि इति वृद्धिनिषेधे अतर्पीत् इति । 'रधादिभ्यश्च' इति विकल्पपक्षे 'वदव्रज' इति वृद्धौ 'अताप्सीत्' इति 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इत्यमपक्षे यणि अत्राप्सीत् इति । 'पुषादिद्युताद्यृलृदितः परस्मैपदेषु' इत्यङपक्षे 'अतृपत्' इति च सिद्धयति ।

दुद्रोहिथ, दुद्रोग्ध, दुद्रोढ (ई० ७५)—द्रुहधातोर्लिटि सिपि 'परस्मैपदानां णलतुमुस्' इत्यादिना थलि द्वित्वे अभ्यासत्वे हलादिः शेषे इटि गुणे दुद्रोहिथ इति । 'वा द्रुहमुह' इति धत्वस्य वैकल्पिकत्वेन पक्षे हस्य धः यस्य 'झषस्तथोर्धोऽधः' इति धत्वे चर्त्वेन घस्य गत्वे दुद्रोग्ध इति, पक्षे 'हो ढः' इति ढत्वे थस्य धत्वे ष्टुत्वेन ढत्वे 'ढो ढे लोपे' इति ढलोपे दुद्रोढ इति सिद्धयति ।

अशमत् (ई० ६८)—शमु धातोर्लुङि अडागमे तिपि च्लौ पुषादित्वात् च्लेरङि अशमत् इति सिद्धम् ।

श्राम्यति (ई० ७८)—श्रमु धातोर्लटि तिपि 'दिवादिभ्यः' इति श्यनि 'शमामष्टानां दीर्घः श्यनि' इति दीर्घे श्राम्यति इति सिद्धम् ।

चक्षमिथ, चक्षन्थ (ई० ६२)—क्षमू धातोर्लिटि थलि द्वित्वे अभ्यासत्वे हलादिः शेषे ऊदित्वाद्वेटि 'चक्षमिथ' इति । इटोऽभावपक्षे अनुस्वारे परसवर्णे 'चक्षन्थ' इति सिद्धम् ।

आस्थत् (ई० ७८)—'असु क्षेपणे' इति धातोर्लुङि अडागमे 'आटश्च' इति वृद्धौ तिपि च्लौ 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङि 'अस्यतेस्थुक्' इति थुकि अनुबन्धलोपे 'आस्थत्' इति । न च पुषादित्वादेव अङ्सिद्धौ 'अस्यतिवक्ती' त्यादिसूत्रे अस्यतिग्रहणं व्यर्थमेवेति वाच्यम् 'पर्यास्थत' इत्यत्र आत्मनेपदे अङर्थं तद्ग्रहणस्यावश्यकत्वात् । पुषादीत्यादिना तु न निर्वाहः परस्मैपदेष्वेव तत्प्रवृत्तेः ।

यसति (ई० ७७)—यस धातोर्लटि तिपि 'यसोऽनुपसर्गात्' इति विकल्पेन शपि 'यसति' इति सिद्धम् । पक्षे श्यनि 'यस्यति' इति सिद्धयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मेद्यति (ई० ६०)—मिद्धातोर्लटि तिपि श्यनि 'मिदेर्गुणः' इति गुणे मेद्यति इति सिद्धम् ।

अमिदत्, अमेदिष्ट (ई० ७८)—भ्वादौ द्युतादिगणे पाठेनैव उक्तरूपद्वयसिद्धौ दिवादिगणे पाठः 'अमेदीत्' इति रूपनिवारणार्थः । यदि गणद्वयसिद्धिरेव इष्टा तदा द्युतादिभ्यः पृथगात्मनेपदेषु भ्वादौ पाठेन 'अमेदिष्ट' इति, पुषादौ दिवादिगणे पाठेन च 'अमिदत्' इति रूपद्वयसिद्धौ द्युतादिगणे तत्पाठो निष्फल एव स्यादिति दिक् ।

इति दिवादिप्रकरणम् ।

अथ स्वादिप्रकरणम्

सुन्वन्ति (ई० ७२)—षुञ् धातोः 'धात्वादेः षः सः' इति सत्वे लटि झौ झस्यान्तादेशे शपं प्रबाध्य 'स्वादिभ्यः श्नुः' इति श्नुप्रत्यये अनुबन्धलोपे 'अचि श्नुधातु—' इति उवङि प्राप्ते तं प्रबाध्य 'हुश्नुवोः सार्वधातुके' इति यणि 'सुन्वन्ति' इति सिद्धचति ।

सुन्वः (ई० ५८)—षु धातोः 'धात्वादेः षः सः' इति सत्वे लटि वसि शपं प्रबाध्य 'स्वादिभ्यः श्नुः' इति श्नुप्रत्यये 'लोपश्चास्यान्यतरस्याम् भ्वोः' इति उकारस्य विकल्पेन लोपे सुन्वः, लोपाभावे सुनुवः इति सिद्धम् ।

सुनवानि (ई० ७५)—षु धातोः 'धात्वादेः षः सः' इति सत्त्वे लोटि मिपि श्नुप्रत्यये मेर्न्यादेशे 'आडुत्तमस्य पिच्च' इति आटि 'हुश्नुवोः' इति यणि प्राप्ते तं प्रबाध्य परत्वात् गुणे अवादेशे सुनवानि इति सिद्धम् ।

असावीत्, असोष्ट (ई० ७४)—षुङ् धातो 'धात्वादेः षः सः' इति सत्वे लुङि 'लुङ्लङ्—' इत्यडागमे लुङस्तिपि च्लौ च्लेः सिचि 'स्तुसुधूञ्भ्यः परस्मैपदेषु' इति इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन ईटि 'इट ईटि' इति सलोपे सवर्णदीर्घे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ आवादेशे 'असावीत्' इति । आत्मनेपदे तु गुणे षत्वे ष्टुत्वे 'असोष्ट' इति सिद्धम् ।

सिन्वन्ति (ई० ८२)—षिञ् धातोः 'धात्वादेः षः सः' इति सत्वे लटि लटः झौ तस्य अन्तादेशे 'स्वादिभ्यः श्नुः' इति श्नप्रत्यये श्नोः शित्त्वात् सार्वधातुकत्वेन 'सार्वधातुकमपित्' इति ङित्त्वात् धातोर्गुणाभावे झिप्रत्ययाश्रित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वित्वेन च श्नोरुकारस्य गुणाभावे 'हुश्नुवोः सार्वधातुके' इति यणि सिन्वन्ति इति सिद्धम् ।

मीयात्, मासीष्ट (ई० ७१)—मि धोतोराशीर्लिङि आत्मनेपदे तप्रत्यये 'लिङः सीयुट्' इति सीयुटि अनुबन्धलोपे 'सुट् तिथोः' इति सुटि 'लोपो व्योर्वलि' इति यलोपे 'मीनातिमिनोतिदीङां ल्यपि च' इत्यनेन आत्वे पत्वे ष्टुत्वे 'मासीष्ट' इति सिद्धम् । परस्मैपदे यासुटि सुटि च कित्वादात्वाभावे दीर्घे सकारद्वयस्य 'स्कोरि'ति लोपे मीयात् इति सिद्ध्यति ।

अमासीत् (ई० ७८)—मि धातोर्लुङि अडागमे तिपि च्लौ सिचि 'मीनातिमिनोतिदीङां ल्यपि च' इत्यात्वे 'यमरमनमातां सक् च' इति सकि इटि च कृते 'अस्तिसिचोऽपृक्ते' इति तकारस्य च ईटि 'इट ईटि' इति सिचः सस्य लोपे सवर्णदीर्घे अमासीत् इति सिद्धम् ।

अमास्त (ई० ६०)—मिञ् धातोर्लुङि अडागमे तप्रत्यये च्लौ च्लेः सिचि 'मीनाति-मिनोति–' इत्यात्वे 'अमास्त' इति सिद्धम् ।

प्रणिचिकाय (ई० ७६)—'प्र-नि' इत्युपसर्गात् चिङ् धातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे 'विभाषा चेः' इति अभ्यासात् परस्य चिनः चस्य कुत्वे 'अचो ञ्णिति' इति वृद्धौ आयादेशे 'नेर्गदे'ति णत्वे प्रणिचिकाय इति । कुत्वाभावे चिचाय इति ।

स्तृषीष्ट (ई० ७२)—स्तृञ् धातोराशीर्लिङि लिङस्तादेशे सीयुटि 'सुट् तिथोः' इति सुटि वलोपे 'ऋतश्च संयोगादेः' इति विभाषया इटि 'गुणोर्ति-संयोगाद्योः' इति गुणे उभयोः सकारयोः पर्यायेण पत्वे ष्टुत्वे 'स्तरिषीष्ट' इति । इडभावपक्षे 'उश्च' इति कित्त्वाद् गुणाभावे 'स्तृषीष्ट' इति सिद्ध्यति ।

स्तरिष्ट (ई० ७७)—स्तृधातोर्लुङि अडागमे लुङस्तादेशे च्लौ, च्लेः सिचि 'ऋतश्च संयोगादेः' इति विभाषया इटि गुणे रपरत्वे सस्य पत्वे ष्टुत्वे 'स्तरिष्ट' इति । इडभावपक्षे 'ह्रस्वादङ्गात्' इति सिचः सस्य लोपे 'उश्चेति' कित्त्वाद् गुणनिषेधे अस्तृत इति ।

ववरिथ (ई० ७६)—वृञ् धातोर्लिटि थलि द्वित्वे अभ्यासत्वे उरदत्वे रपरत्वे, हलादिः शेषे कृते 'वभूथाततन्थजगृम्भववर्थेति निगमे' इति वेदे इडभावस्य उक्तत्वात् भाषायां थलीट् भवति तेन 'आर्धधातुकस्य–' इति इटि गुणे विवरिथ इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वृषोष्ट, वरिषीष्ट (ई० ६७)—वृञ्वातोराशीर्लिङि तङि सीयुटि, सुटि 'लिङ्सिचावात्मनेपदेषु' इति विभाषया इटि 'वृतो वा' इति दीर्घे प्राप्ते 'न लिङि' इति निषेधे गुणे रपरत्वे उभयोः सकारयोः पर्यायेण षत्वे ष्टुत्वे वरिषीष्ट इति । इडभावपक्षे 'उश्चे'ति कित्त्वाद् गुणाभावे वृषीष्ट इति सिद्धम् ।

दुधोथ, दुधविथ (ई० ६६)—धूञ् धातोर्लिटि सिपि थलि 'लिटि धातोः' इति द्वित्वे अभ्यासत्वे ह्रस्वे 'अभ्यासे चर्च' इति जश्त्वे 'स्वरतिसूति'–इति विभाषया इटि 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे दुधविथ इति । इडभावपक्षे गुणे दुधोथ इति ।

दुधुविव (ई० ७६)—धूवातोर्लिटि वसि वसः 'परस्मैपदानां णल' इति वादेशे द्वित्वे अभ्यासत्वे ह्रस्वे 'अभ्यासे चर्च' इति जश्त्वे 'पुरस्तादपवादा अनन्तरान् विधीन् वाधन्ते नोत्तरान्' इति न्यायेन 'स्वरतिसूति' इति परत्वाद् प्राप्तस्य इटः 'श्रयुकः किति' इति निषेधेऽपि क्रादिनियमात् नित्यमिटि 'अचिश्नु-धातु–' इति उवङि 'दुधुविव' इति सिद्धम् ।

अधावीत् (ई० ७८)—धूधातोर्लुङि अडागमे तिपि 'इतश्च' इति तिप इकारलोपे च्लौ च्लेः सिचि 'स्तुसुधूञ्भ्यः–' इति परत्वान्नित्ये इटि 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि 'इट ईटि' इति सलोपे सवर्णदीर्घे 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ आवादेशे 'अधावीत्' इति सिद्धम् ।

प्रहिणोति (ई० ७५)—प्रेत्युपसर्गात् हिवातोर्लुटि तिपि 'स्वादिभ्यः श्नुः' इति श्नुप्रत्यये गुणे 'हिनुमीना' इति णत्वे 'प्रहिणोति' इति सिद्धम् ।

जिघाय (ई० ७०)—हिवातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे 'कुहोश्चुः' इति चर्त्वेन झकारे तस्य 'हेरचडि' इति अभ्यासात् परस्य हस्य घत्वे 'अचो-ञ्णिति' इति वृद्धौ आयादेशे 'जिघाय' इति सिद्धम् ।

आप्नुवन्ति (ई० ६०)—आप्ल् धातोर्लटि झेः अन्तादेशे 'स्वादिभ्यः श्नुः' इति श्नौ उवङि 'आप्नुवन्ति' इति । संयोगपूर्वकत्वात् 'हुश्नुवो'–रिति ण् भवति ।

अपरेधतुः (ई० ६७)—अपोपसर्गकात् रावधातोर्लिटि तसि तसोऽनुसि द्वित्वे अभ्यासत्वे हलादिः शेषं प्रवाध्य 'राधो हिंसायाम्' इति एत्वाभ्यासलोपयोः सस्य रुत्वे विसर्गे अपरेधतुः इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आनशे (ई० ७१)—अशू धातोर्लिटि तङि 'लिटस्तझयः' इत्येशि द्वित्वे अभ्यासत्वे हलादिः शेषे 'अत आदेः' इत्यभ्यासस्य दीर्घे सवर्णदीर्घे 'अश्नोतेश्च' इति नुटि आनशे इति सिद्धम् ।

आष्ट (ई० ७७)—अशू धातोर्लुङि आटि लङः तादेशे 'आटश्च' इति वृद्धौ च्लौ च्लेः सिचि उदित्वाद्वेटि षत्वे ष्टुत्वे आशिष्ट इति । इति इडभावपक्षे 'झलो झलि' इति सिचो लोपे 'आष्ट' इति सिद्ध्यति ।

ददम्भ (ई० ५४)—दम्भधातोर्लिटि तिपि णलि अनुबन्धलोपे द्वित्वे अभ्यासत्वे हलादिः शेषे ददम्भ इति सिद्धम् । न चात्र 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनाम् लिटः कित्वं वे'ति व्याकरणान्तरस्येहाप्याश्रयणात् लिटः कित्वेन नलोपः तस्यासिद्धत्वेन एत्वाभ्यासलोपश्च कुतो नेति वाच्यम् । इदं कित्वं अपिद्विषयमेवेति आत्रेयन्यासकारादिमतेन तिपि कित्वस्याप्रवृत्तेः । इदं कित्वं पिदपिद्विषयकमिति सुधाकारादिमते तु तिप्सिप्मिप्सु कित्वेन नलोपे एत्वाभ्यासलोपयोः देभ, देभतुः, देभिथ इत्यादि भवत्येव । कौमुदीकारास्तु कित्वं वेति पठिन्त । तन्मते उभयविधं रूपं भवति इति दिक् ।

ददम्भतुः देभतुः (ई० ५९)—'दम्भु दम्भने' लोकवज्ञनाथ विहितकर्मानुष्ठानं दम्भः । उपदेशे 'दम्भ' इति ततोऽनुस्वारे परसवर्णे दम्भधातोः, लिटि तसि तसोऽतुसि द्वित्वेऽभ्यासत्वे 'श्रन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्वं वा' इति कित्वपक्षे 'अनिदिताम्–' इति नलोपे तस्य आभीयत्वादसिद्धत्वेन 'अत एकहल्मध्ये–' इत्यस्याप्राप्त्या 'दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ' इत्यभ्यासलोपयोः कृतयोः सस्य रुत्वे विसर्गे 'देभतुः' इति । कित्वाभावपक्षे 'ददम्भतुः' इति सिद्ध्यति ।

देभिथ (ई० ७६)—दम्भ धातुः उपदेशे दम्भ इति । तस्माल्लिटि सिपि थलि 'दम्भ थ' इति स्थिते द्वित्वेऽभ्यासत्वे 'श्रन्थिग्रन्थिदाम्भिस्वञ्जीनां लिटः कित्वं वा' इति वार्तिकेन विभाषया कित्वे 'अनिदिताम्–' इति नलोपे नलोपस्यासिद्धत्वात् 'अत एकहल्मध्य–' इत्यस्याप्राप्त्या 'दम्भेश्च एत्वाभ्यासलोपौ वक्तव्यौ' इत्येत्वे अभ्यासलोपे च कृते 'आर्धधातुकस्येड्वलादेः' इति इटि 'देभिथ' इति । न्यासकारमते 'श्रन्थिग्रन्थि–' इत्यादिना लिटां कित्वमपिद्विषयकमेवेति कित्वाभावात् नलोपाभावे द्वित्वादिकार्ये 'ददम्भिथ' इत्येव । सुधाकरमते तु

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कित्वं पिदपिद्विषयकम् तेन लिटः नित्यं कित्वं देभिथ इत्येव । दीक्षितमते तु कित्वस्य वैकल्पिकत्वेन द्विविधमपि रूपं उचितमेव ।

न तद् यशः शस्त्रभृतां क्षिणोति- (ई० ७६)—क्षिधातोर्लटि तिपि 'स्वादिभ्यः श्नुः' इति श्नु प्रत्यये गुणे क्षिणोति इति सिद्धम् । न च क्षिधातोः छन्दोविषयकत्वेन कथं लौकिके काव्ये, 'इमां हृदि व्यायतपातमक्षिणोत्, न तद् यशः शस्त्रभृतां क्षिणोति, पञ्चबाणः क्षिणोति' इत्यादि प्रयोगाः संगच्छन्ते इति वाच्यम् आत्रेयमैत्रेयादयः भाषायामपि इति पठन्ति तेन सिद्धेः । शाकटायनस्तु वेद एवेति मन्यते तन्मते चिन्त्यमिदम् ।

इति स्वादिप्रकरणम् ।

अथ तुदादिप्रकरणम्

तुदादि—तुद घातोर्लटि तिपि शपं प्रवाध्य 'तुदादिभ्यः शः' इति शे तुदति इति सिद्धम् । न च शप्रत्यवात् पूर्वं परत्वात् लघूपधगुणः कुतो नेति वाच्यम् नित्यत्वात्, गुणं प्रवाध्य शे रूपसिद्धेः ।

वभ्रज्ज, वभर्ज (ई० ७१)—भ्रस्ज्धातोर्लिटि तिपि णलि 'भ्रस्जोरोपधयोरमन्यतरस्याम्' इति रेफककारयोः स्थाने रमागमे रेफस्य ककारस्य च निवृत्तौ 'भर्ज अ' इति स्थिते द्वित्वेऽभ्यासत्वे हलादिः शेषे 'आभ्यासे चर्च' इति जश्त्वे 'वभर्ज' इति सिद्धम् । रमोऽभावपक्षे तु सस्य श्चुत्वेन शत्वे 'झलां जश् झशि' इति शस्य जश्त्वेन जत्वे 'वभ्रज्ज' इति सिद्धचति ।

वभर्जिथ, वभ्रष्ठ (ई० ७८)–भ्रस्ज्धातोर्लिटि सिपि थलि द्वित्वे अभ्यासत्वे, हलादिः शेषे 'भ्रस्जोरोपधयोरमन्यतरस्याम्' इति रमागमे स्थानषष्ठी निर्देशात् रोपधयोश्च निवृत्तौ 'एकाच उपदेशेऽनुदात्तात्' इति इड्निषेधे भारद्वाजमते विकल्पेन इटि 'वभर्जिथ' इति । इडभावपक्षे 'ब्रश्चभ्रस्ज–' इति पत्वे ष्टुत्वे 'वभ्रष्ठ' इति । रमागमाभावपक्षे द्वित्वादिकार्ये कृते भारद्वाजमतेन विभाषया इटि सस्य श्चुत्वेन शत्वे 'झलां जश् झशि' इति तस्य जत्वे वभ्रज्जिथ इति । रमः इट्भावपक्षे द्वित्वादिकार्ये कृते 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'ब्रश्चभ्रस्ज–' इति पत्वे 'वभ्र'ष्ठ इति चतुर्थं रूपम् ।

भृज्जयात् (ई० ७७)—भ्रस्जधातोराशीर्लिङि तिपि अनुबन्धलोपे 'इतश्च'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति तिप इकारलोपे यासुटि सुटि 'किदाशिषि' इति यासुटः कित्वात् किङ्ति 'भ्रस्जोरोपधयोः' इति रमागमं बाधित्वा पूर्वविप्रतिषेधेन पूर्वं कित्वात् 'ग्रहिज्या' इति सम्प्रारणे पूर्वरूपे 'स्कोः संयोगाद्योरन्ते च' इति सकारयोः लोपे 'भ्रस्ज्यात्' इति स्थित धातोस्सकारस्य श्चुत्वेन शकारे 'झलां जश' इति शस्य जत्वे 'भृज्ज्यात्' इति ।

अभार्क्षीत् (ई० ७५)—भ्रस्ज्धातोर्लुङि अडागमे तिपि च्लौ सिचि 'भ्रस्जोरोपधोः–' इति रमागमे 'व्रश्चभ्रस्ज–' इति षत्वे 'षढो कः सि' इति षस्य कत्वे सस्य षत्वे तिप इकारलोपे इटि 'वदव्रज–' इति वृद्धौ 'अभार्क्षीत्' इति । रमोऽभावे 'स्कोः–' इति सलोपे 'व्रश्च–' जस्य षत्वे षस्य कत्वे सिचः सस्य षत्वे 'व्रदव्रज–' इति वृद्धौ 'अभ्राक्षीत्' इति । आत्मनेपदे तु 'अभर्ष्ट' इति सिद्धम् ।

क्रष्टा (ई० ७३)—कृषधातोर्लुटि तिपि शपं प्रबाध्य 'लृलुटोः' इति तासि प्रत्यये इकारलोपे 'लुटः प्रथमस्य डारौरसः' इति तिपो डादेशे डित्त्वसामर्थ्यादस्यापि टेर्लोपे 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति विभाषया अमागमे यणि ष्टुत्वे 'क्रष्टा' इति । अमोऽभावे 'पुगन्तलघूपधस्य च' इति गुणे ष्टुत्वे 'क्रष्टर्ा' इति च भवति ।

अकृक्षत्, अकार्क्षीत् (ई० ७९)—कृष्धातोर्लुङि 'लुङ्लङ्' इत्यडागमे परस्मैपदे तिपि अनुबन्धलोपे च्लौ 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' इति वार्तिकेन च्लेः सिचि इचि गते 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति वैकल्पिकेन अमि यणि अनुबन्धलोपे 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'षढोः कः सि' इति धातोः षस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य ईटि अनुबन्धलोपे 'अक्राक्षीत्' इति । अमोऽभावे वृद्धौ रपरत्वे 'अकार्क्षीत्' इति । सिजभावपक्षे 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे अटि षस्य कत्वे षत्वे कित्वाद् गुणाऽभावे 'अकृक्षत्' इति रूपत्रयं सिद्धयति ।

अकृक्षत, अकृष्ट (ई० ७८)—कृष्वातोर्लुङि अडागमे लुङस्तादेशे च्लौ 'स्पृशमृशकृष' इति विभाषया च्लेः सिचि 'लिङ्सिचावात्मनेपदेषु' इति कित्वादमृगुणयोरभावे 'अकृष स् त' इति स्थिते 'झलो झलि' इति सलोपे ष्टुत्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अकृष्ट' इति । सिजभावे अटि 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे अनुबन्धलोपे 'अ कृष् स् त' इति स्थिते कित्वादम्गुणयोरभावे 'षढोः कः सि' इति धातोः षकारस्य कत्वे सस्य षत्वे 'अकृक्षत' इति सिद्धम् ।

वव्रश्च (ई० ७८)—व्रश्च् धातोर्लिटि तिपि णलि द्वित्वे अभ्यासत्वे 'लिटचभ्यासस्योभयेषाम्' इत्यभ्यासरेफस्य सम्प्रसारणे 'उरत्' इति अत्वे रपरत्वे हलादिः शेषे 'वव्रश्च' इति सिद्धम् ।

नच 'व र् व्रश्च अ' इति स्थिते अभ्यासवकारस्यापि पुनः सम्प्रसारणं कुतो नेति वाच्यम, उरदत्वस्य 'अचः परस्मिन्–' इति स्थानिवत्त्वेन 'न सम्प्रसारणे' इति निषेधात् ।

वव्रश्चिथ (ई० ७४)—वश्च-धातोर्लिटि तत्स्थाने सिपि तस्य 'परस्मैपदाना'-मित्यादिना थलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्यासंज्ञायाम् 'असंयोगाल्लिट् कित्' इत्यनेन लिटः कित्वात् 'लिटचभ्यासस्योभयेषाम्' इत्यनेनाभ्यासरेफस्य सम्प्रसारणे पूर्वरूपे 'उरत्' इत्यत्वे रपरत्वे हलादिः शेषे उदित्वात् 'स्वरतिसूतिसूयतिधूञूदितो वा' इत्यनेन वैकल्पिके इडागमे 'वव्रश्चिथ' इति सिद्धम् । इडभावपक्षे 'वश्चेति' षत्वे ततः ष्टुत्वे सति 'वव्रष्ठ' इति रूपम् । ऋकारस्य पूर्वं सम्प्रसारणे कृते वस्य पुनः सम्प्रसारणन्तु न भवति उरदित्यत्वस्य 'अचः परस्मिन्नि' ति स्थानिवद्भावेन 'न सम्प्रसारणम्' इति निषेधात् । नचोरदत्वस्य परनिमित्तकत्वाऽभावाकथं स्थानिवत्त्वमिति वाच्यम्, आपादपरिसमाप्तेरङ्गाधिकारत्वेन अङ्गाक्षिप्तप्रत्ययनिमित्तकत्वाभ्युपगमात् । नच पूर्वं वस्यैव सम्प्रसारणं कुतो नेति वाच्यम्, 'न सम्प्रसारणे' इति निषधारम्भसामर्थ्यात् पूर्वं रेफस्यैव सम्प्रसारणत्वाऽवगमादिति दिक् ।

व्यचिता (ई० ७१)—व्यच–धातोर्लुटि तत्स्थाने तिपि अनुबन्धलोपे 'स्यतासीलृलुटोः' इत्यनेन तासिप्रत्यये 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशे डित्वाट्टिलोपे 'आर्धधातुकस्येड्वलादेः' इडागमे अनुबन्धलोपे 'व्यचिता' इति सिद्धम् । नच 'व्यचेः कुटादित्वमनसी'ति व्यचेः कुटादित्वात् 'गाङ्कुटादिभ्यः' इत्यनेन ञ्नित्वात् 'ग्रहिज्ये'ति सम्प्रसारणं कुतो नेति वाच्यम्, 'अनसीति' पर्युदासेन क्त्रिन्मात्रविषय एव व्यचेः कुटादित्वाऽवगमात् ।

व्यचेः कुटादित्वमिति (ई० ७४)—ननु 'व्यचेः कुटादित्वमनसि' इति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यच्वातोः कुटादित्वात् 'याङ्कुटादिभ्योऽञ्णिन्ङित्' इत्यनेन तासादेर्ङित्त्वाभावे तस्मिन् परे व्यचो यकारस्य 'ग्रजिये'त्यनेन सम्प्रसारणे लुटि 'विच्चता' इत्यादि कथं न भवतीति चेन्न, अनसीति पर्युदासेन अस्भिन्नाऽस्सदृशस्य कृत्त्वेनैव तत्र ग्रहणात्। तथा च असभिन्नकृत्प्रत्यये एव तत्प्रवृत्तेरिति दिक्।

अव्याचीत् (ई० ६९)—व्यच् धातोर्लुङि अटि तिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे च्लेः सिचि आर्धधातुकस्येड्वलादेः' इति इटि 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य ईटि' 'अतो हलादेर्लघोः' इति विकल्पेन वृद्धौ 'इट इटि' इति सलोपे सवर्णदीर्घे 'अव्याचीत्' इति। वृद्धचभावे 'अव्यचीत्' इति च सिद्धम्।

आनर्च्छ (ई० ७८)—ऋच्छधातोर्लिटस्तिपि णलि अनुबन्धलोपे 'लिटि धातो' रिति द्विर्वे 'ऋच्छ ऋच्छ अ' इति स्थिते अभ्याससंज्ञायाम् 'उरत्' इत्यभ्यासस्य ऋवर्ण अत्वे रपरत्वे 'हलादिः शेष' इत्यभ्यासरेफस्य छस्य च लोपे 'अ ऋच्छ अ' इति स्थिते 'तस्मान्नुड्द्विहलः' इति द्विहल्ग्रहणस्याऽनेकहलुपलक्षणत्वान्नुटि अनुबन्धलोपे 'आ न् ऋच्छ् अ' इति दशायाम् 'ऋच्छत्यृताम्' इति गुणे रपरे 'आनर्च्छ' इति।

लोभिता (ई० ७२)—लुभधातोर्लुटि तिपि तासि तस्याऽर्धधातुकत्वे 'तीषसहलुभरुषरिषः' इति विकल्पेन इटि अनुबन्धलोपे 'पुनन्तलघूपधस्य च' इति गुणे तिपो डादेशे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'लोभिता' इति। इडभावे 'झषस्तथोर्धोऽधः' इति तस्य धत्वे 'झलां जश्' इति भस्य बत्वे गुणे 'लोब्धा' इति सिद्धम्।

तृम्फति (ई० ७५)—'तृम्फ' धातुरुपदेशे 'तृन्फ' इति तस्माल्लटि तिपि 'तुदादिभ्यः श' इति शप्रत्यये शस्याऽपित्वेन 'सार्वधातुकमपित्' इति ङित्वे 'अनिदिताम्' इति नलोपे 'शे तृम्फादीनां नुम्वाच्यः' इति वार्तिकेन नुमि अनुबन्धलोपे अनुस्वारे परसवर्णे 'तृम्फति' इति सिद्धम्।

आनर्फ (ई० ७८)—'ऋफ्'-धातोर्लिटि तत्स्थाने तिपि तस्य णलादेशे अनुबन्धलोपे द्विर्वेऽभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरत्वे हलादिशेषे 'अत आदेः' इत्यनेनाभ्यासदीर्घे 'तस्मानुड् द्विहलः' इत्यनेन नुडागमे अनुबन्धलोपे गुणे 'आनर्फ' इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निःस्फुरति (ई० ७८)—निर इत्युपसर्गात् स्फुरधातोर्लटि तिपि 'तुदादिभ्यः श' इति शप्रत्यये 'स्फुरतिस्फुलत्योर्निनिविभ्यः' इति सूत्रेण विभाषया षत्वे रेफस्य विसर्गे 'निःष्फुरति' इति । षत्वाभावे 'निःस्फुरति' इति सिद्धयति ।

ङित्वं स्वरार्थम् (ई० ७८)—नच मृङ् धातोः ङित्वादेव अनुदात्तङित इति आत्मनेपदं स्यादिति 'ञ्नियतेर्लुङ्लिङोश्च' इत्यात्मनेपदं किमर्थं विधीयते इति वाच्यम् । 'लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् नान्यत्रे' इति नियमार्थं सूत्रस्यावश्यकत्वात् । न च पित्वस्य किं फलमिति वाच्यम्, तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तम्' इति स्वरार्थं तस्यावश्यकत्वात् ।

रियति (ई० ७१)—'रि' धातोर्लटि तिपि 'तुदादिभ्यः शः' इति शप्रत्यये कृते 'अचि श्नुधातु –इति इयङि 'रियति' इति सिद्धम् ।

चकरतु (ई० ६०)—कृधातोर्लिटस्तसि तसोऽतुसि द्वित्वे अभ्यासत्त्वे ह्रस्वे 'उरत्' इत्यत्वे रपरत्वे हलादिः शेषे 'कुहोश्चुः' इति चुत्वे च 'कृ अतुस्' इति स्थिते 'ऋच्छत्यृताम्' इति गुणे रपरे सकारस्य रुत्वे विसर्गे 'चकरतुः' इति सिद्धम् ।

उपास्किरत् (ई० ७२)—'उप' इत्युपसर्गात् कृधातोर्लङस्तिपि शप्रत्यये 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे तिप इकारलोपे 'ऋत इद्धातोः' इति इत्वे रपरत्वे 'उप अ किर् त्' इति दशायाम् अभ्यासव्यवायेऽपि 'सुट् कात्पूर्व इति वक्तव्यम्' इति वार्तिकबलात् अड्व्यवधानेऽपि ककारात् पूर्वं सुटि अनुबन्धलोपे सवर्णदीर्घे 'उपास्किरत्' इति सिद्धम् ।

प्रतिस्किरति (ई० ६७)—'प्रति' उपसर्गात् कृधातोर्लटि तिपि 'तुदादिभ्यः शः' इति शप्रत्यये इत्वे रपरत्वे 'हिंसायां प्रतेश्च' इति सुटि 'प्रतिस्किरति' इति सिद्धम् ।

गिलति (ई० ६६)—गॄ धातोर्लटस्तिपि शप्रत्यये अनुबन्धलोपे 'ऋत इद्धातोः' इति इत्वे रपरत्वे 'अचि विभाषा' इति वैकल्पिके लत्वे 'गिलति' इति । लत्वाभावे 'गिरति' इति च सिद्धम् ।

गलीता (ई० ७५)—'गॄ' धातोर्लुटि तत्स्थाने तिप्यनुबन्धलोपे तासिप्रत्यये गुणे रपरत्वे 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशे डित्वाट्टिलोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेनेडागमे 'वृतो वा' इत्यनेन वैकल्पिके इटो दीर्घे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'अचि विभाषा' इत्यनेन वैकल्पिके लत्वे 'गलीता' इति सिद्धम्। दीर्घाभावे गलिता। लत्वाभावे दीर्घे 'गरीता'। दीर्घाभावे तु 'गरिते ति' रूपाणि भवन्ति।

अप्राक्षीत् (ई० ७७)—प्रच्छधातोर्लुङि 'लुङ्लङ्' इत्यडागमे लुङ्सिपि अनुबन्धलोपे 'इतश्च' इति तिप इकारलोपे च्लौ च्लेः सिचि 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति छस्य षत्वे 'षढोः कः सि' इति षस्य कत्वे 'अस्तिसिचोऽपृक्ते' इति अपृक्तसंज्ञकस्य तस्य ईटि 'वदव्रजे'ति वृद्धौ 'अप्राक्षीत्' इति सिद्धम्।

ममङ्क्थ (ई० ७२)—मस्ज्धातोर्लिटि सिपि थलि अनुबन्धलोपे द्वित्वे अभ्यासत्वे 'हलादिः शेषः' इत्यभ्यासस्यान्तहलो लोपे 'म मस्ज् थ' इति जाते 'स्तोः श्चुना श्चुः' इति सस्य श्चुत्वेन शत्वे 'झलां जश्' इति शस्य जश्त्वेन जत्वे 'ऋतो भारद्वाजस्य' इति विभाषया इटि झलादित्वाऽभावान्नुमोऽभावे 'ममज्जिथ' इति। इडभावे तु 'मस्जिनशोर्झलि' इति सूत्रेण 'मस्जेरन्त्यात्पूर्वो नुम्वाच्य' इति वार्तिकबलात् सकारात् परे नुमि अनुबन्धलोपे 'म मस् न् ज् थ' इति दशायां 'स्कोः संयोगाद्योरन्ते च' इति सलोपे 'म मन् ज् थ' इति भूते 'चोः कुः' इति जस्य कुत्वेन गत्वे 'खरि च' इति गस्य कत्वे नस्यानुस्वारे परसवर्णे 'ममङ्क्थ' इति च सिद्धम्।

विच्छायति (ई० ६७)—विच्छ्धातोः, 'गुपूधूपूविच्छपणिपनिभ्य आयः' इत्यनेन आयप्रत्यये 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि तत्स्थाने तिपि अनुबन्धलोपे शपं प्रवाध्य 'तुदादिभ्यः शः' इत्यनेन शप्रत्यये शकारस्येत्संज्ञायां लोपे पररूपे विच्छायति इति सिद्धम्।

विविच्छ (ई० ६४)—'विच्छ' धातोर्लिटि 'गुपूधूपूविच्छपणिपनिभ्य आयः' इत्यनेन वैकल्पकेन आयप्रत्ययविधानात्तदभावपक्षे तत्स्थाने तिपि 'परस्मैपदानामि'त्यादिना णलि 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादि-शेषे 'विविच्छ' इति सिद्धम्। आयप्रत्ययपक्षे तु विच्छायाञ्चकार इति सिद्धयति।

अम्राक्षीत् (ई० ७३)—मृश्धातोर्लुङि अटि तिपि अनुबन्धलोपे च्लौ 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वक्तव्यः' इति वार्तिकेन विकल्पेन च्लेः सिचि 'अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्' इति विभाषया अमि मलोपे ऋकारस्य यणि 'इतश्च' इति तिप इकारलोपे 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति शस्य षत्वे 'वदव्रजहलन्तस्याचः' इति वृद्धौ 'षढोः कः सि' इति षस्य कत्वे 'आदेशप्रत्यययोः' इति सिचः सस्य षत्वे 'अस्तिसिचोऽपृक्ते' इति इटि अनुबन्धलोपे 'अम्राक्षीत्' इति। अमोऽभावे उक्तसूत्रेण विभाषया च्लेः सिच् 'अमृश् स् त्' इति स्थिते ईटि 'वदव्रजे'ति वृद्धौ रपरत्वे 'ब्रश्चे'ति षत्वे तस्य कत्वे सिचः सस्य च षत्वे 'अम्राक्षीत्' इति। सिजभावे तु 'शल इगुपधादनिटः क्सः' इति च्लेः क्सादेशे धातोः शस्य 'ब्रश्चे'ति षत्वे तस्य च कत्वे सिचः सस्य च षत्वे कित्वाद् वृद्धचभावे 'अमृक्षत' इति च सिद्धं भवति।

सद्धातोः स्वादिगणे पाठफलम् (ई० ७७)—विशरणगत्यवसादनार्थकः 'सद्लृ' धातुर्हि भ्वादौ ज्वलादिगणे, तथा तुदादौ च पठितः। पुनरत्र स्वादौ पाठस्येदमेव फलम् यत् शब्विकरणाच्छत्रन्तान् ङीपि 'आच्छीनद्योर्नुम्' इत्यनेन विकल्पेन नुमि सीदन्ती 'सीदती' इति रूपद्वयं स्यात्। अन्यथा 'शप्श्यनोर्नित्यम्' इत्यनेन नित्यनुमापत्तावेकमेव रूपं स्यात्। न च ज्वलादौ पाठस्य किं फलमिति वाच्यम्, 'साद' इत्यादौ 'ज्वलतिकसन्तेभ्यः' इत्यनेन णप्रत्ययार्थन्तदावश्यकत्वात्। अन्यच्च शपि 'अनुदात्तौ सुप्पितौ' इत्यनेनानुदात्तत्वं सिद्धचति, शे तु 'प्रत्ययः' इति आद्युदात्तः स्यात् इति स्वारार्थं भ्वादौ पाठस्यावश्यकत्वात्।

अमुचत् (ई० ७३)—मुच् धातोर्लुङि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे लुङस्तिति अनुबन्धलोपे 'इतश्च' इति इकारलोपे च्लौ 'पुषादिद्युताद्लृदितः परस्मैपदेषु' इति च्लेरङि ङित्वाद् गुणाभावे 'अमुचत्' इति सिद्धम्।

अलिपत् (ई० ७७)—लिप्धातोर्लुङि 'लुङ्लङ्' इत्यडागमे अनुबन्धलोपे लुङस्तिपि अनुबन्धलोपे 'इतश्च' इति इकारलोपे च्लौ 'लिपि सिचि ह्वश्च' इति च्लेरङि अनुबन्धलोपे ङित्वात् गुणाभावे 'अलिपत' इति सिद्धम्।

विन्दति (ई० ७०)—'विद्लृ' धातोर्लटि तिपि 'तुदादिभ्यः शः' इति शप्रत्यये 'शे मुचादीनाम्' इति नुमि विन्दति इति।

वेदिता (ई० ७३)—'विद'-धातोर्लुटि तत्स्थाने तिप्यनुबन्धलोपे 'स्यतासी लृलुटोः' इत्यनेन तासि प्रत्यये 'लुटः प्रथमस्य डारौरसः' इति तिपो डादेशे ङित्त्वाट्टिलोपे लघूपधगुणे व्याघ्रभूतादितेन सेट्कत्वात् 'आर्धधातुकस्येड्वलादेः' इत्यनेन इडागमेऽनुबन्धलोपे 'वेदिता' इति। भाष्यादिमतेऽनिट्कत्वादिडभावे चर्त्वे वेत्तेति सिद्धम्।

इति तुदादिप्रकरणम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ रुधादिप्रकरणम्

रुन्धः (ई० ७६)—रुध्धातोर्लटस्तसि शपं प्रबाध्य श्नमि अनुबन्धलोपे 'रु न ध तस्' इति स्थिते णत्वे श्नमो नकारान्तगंताकारस्य 'श्नसोरल्लोपः' इत्यनेन लोपे णत्वस्यासिद्धत्वात् नस्यानुस्वारे परसवर्णे नकारे 'झषस्तथोर्धोऽधः' इति तसस्तकारस्य धत्वे 'झरो झरि सवर्णे' धातोर्धस्य लोपे सस्य रुत्वे विसर्गे 'रुन्धः' इति । नच परसवर्णे कृते पुनः णत्वं कुतो नेति वाच्यम्, परसवर्णस्यासिद्धत्वात् । न च अल्लोपस्य स्थानिवत्त्वात् अनुस्वारो न स्यादिति वाच्यम् 'न पदान्त—' इति निषेधात् ।

अरुणः, अरुणत् (ई० ७०)—रुध्धातोर्लङि अटि सिपि श्नमि णत्वे हल्ङ्यादिना सलोपे धस्य जश्त्वेन दत्वे 'दश्चे'ति दस्य रुत्वे रेफस्य विसर्गे 'अरुणः' इति । रुत्वाभावे धस्य चर्त्वे 'अरुणत्' इति रूपं भवति ।

हनस्ति (ई० ७४)—'हिसि' धातोर्लटस्तिपि 'इदितो नुम्धातो' रिति धातोरिदित्वान्नुमि श्नमि अनुबन्धलोपे 'हि न् स् ति' इति जाते 'श्नान्नलोपः' इति श्नमः परस्य नस्य लोपे 'हिनस्ति' इति सिद्धम् ।

शिण्ड्ढि (ई० ७४)—'शिष्' धातोर्लोटः सिपि शपं प्रबाध्य श्नमि अनुबन्धलोपे 'सेर्ह्यपिच्च' इति सेर्ह्यादेशे 'शिनस् हि' इति दशायां 'हुझल्भ्यो हेर्धिः' इति हस्य धत्वे । 'ष्टुना ष्टुः' इति षस्य ढत्वे 'झलां जश् झशि' इति षस्य जश्त्वेन डकारे 'शिनड् ढि' इति स्थिते अल्लोपे 'झरो झरि सवर्णे' इति डलोपे नस्यानुस्वारे परसवर्णे च कृते 'शिण्ढि' इति । डलोपाभावे तु 'शिण्ड्ढि' इति बोध्यम् । नचात्रल्लोपस्य स्थानिवत्त्वात् परसवर्णो न स्यादिति वाच्यम्, 'न पदान्तेति' सवर्णानुस्वारयोः स्थानिवत्त्वनिषेधात् ।

तृणेढि (ई० ७६)—'तृह्' धातोर्लटस्तिपि शपमपवाद्य श्नमि अनुबन्धलोपे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति श्नमो नस्य णत्वे 'तृण ह् ति' इति स्थिते 'तृणह इम्' इति इमि अनुबन्धलोपे 'तृण इह् ति' इति दशायाम् 'आदृगुणः' इति गुणे 'हो ढः' इति हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तिपस्तकारस्य धकारे धस्य ष्टुत्वेन ढकारे 'ढो ढे लोपः' इति पूर्वढकारस्य लोपे 'तृणेढि' इति सिद्धम् ।

ओदनं भुङ्क्ते (ई० ७५)—भुजधातोः 'भुजोऽनवने' इति रक्षणादतिरिक्ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भोजनेऽर्थे आत्मनेपदे तप्रत्यये टेरेत्वे श्नमि अल्लोपे जस्य कुत्वे नस्यानुस्वारे परसवर्णे भुङ्क्ते इति सिद्धम्। अवनेऽर्थे तु परस्मैपदे भुनक्ति इति सिद्धचति।

ननु भुजधातोः पालनम् अभ्यवहारश्चेत्यर्थद्वयम्। तत्र भुजो अदने इत्येव वक्तव्ये अनवने इति पर्युदासग्रहणं किमर्थमिति, चेत् शृणु, अनवने इति पर्युदासस्य प्रयोजनद्वयम्। 'संयोगो विप्रयोगश्चे'ति अभियुक्तोक्तदिशा संयोगवद् विप्रयोगस्यापि विशेषाधारणार्थत्ववत् रौधादिकस्य भुजेर्ग्रहणमित्येकम्। तेन भुजो कौटिल्ये इति तौदादिकस्य न ग्रहणम्। अदनार्थादर्थान्तरेऽप्युपभोगादौ आत्मनेपदं भवतीति द्वितीयम्, तेन 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्'। 'वृद्धो जनो दुःखशतानि भुङ्क्ते', इत्यादौ आत्मनेपदं सिद्धचति। उक्तोदहरणयोः उपभोगः, आत्मसात्करणञ्च भुजेरर्थः। बुभुजे इत्यस्य स्वाधीनांचकार इत्यर्थः।

अतृणेड् (ई० ७९)—तृह् धातोर्लङि 'लुङ्लङ्' इत्यटि लङस्तिपि अनुबन्धलोपे तिप इकारलोपे 'अ तृह त्' इति दशायां शपमपवाद्य श्नमि 'तृणह इम्' इति इमागमे अनुबन्धलोपे 'ऋवर्णान्नस्य णत्वं वाच्यम्' इति नस्य णत्वे 'आद्गुणः' इति गुणे 'अतृणेह् त्' इति जाते 'हो ढः' इति हस्य ढत्वे हल्ङ्यादिना तलोपे 'झलां जशोऽन्ते' इति ढस्य डत्वे 'वाऽवसाने' इति चर्त्वे अतृणेट् इति सिद्धम्।

औनत् (ई० ७८)—'उन्दो धातोर्लङि' तिपि शपमपवाद्य श्नमि अनुबन्धलोपे उनन्दति' इति जाते 'आडजादीनाम्' इत्यादि अनुबन्धलोपे 'आटश्च' इति वृद्धौ 'श्नान्नलोपः' इति धातोर्नस्य लोपे 'औनदति' इति स्थिते 'इतश्च' इति इकारलोपे 'हल्ङ्याब्भ्य' इति तलोपे 'वाऽवसाने' इति दस्य चर्त्वे 'औनत्' इति चर्त्वाऽभावे 'औनद्' इति च भवति।

अनजानि (ई० ७२)—'अञ्ज्धातोर्लोटः स्थाने मिपि श्नमि अनुबन्धलोपे 'श्नान्नलोपः' इति धातोर्नकारस्य लोपे 'मेर्निः' इति मेन्यादेशे 'आडुत्तमस्य पिच्च' इत्यादि अनुबन्धलोपे 'अनजानि' इति सिद्धम्।

आनक् (ई० ७७)—अञ्ज्धातोर्लङस्तिपि श्नमि 'इतश्च' इति तिप इकारलोपे 'श्नान्नलोपः' इति नलोपे 'आडजादीनाम्' इत्यादि 'आटश्च' इति वृद्धौ 'हल्ङ्याब्भ्यः' इति तलोपे 'चोः कुः' इति जस्य कुत्वेन गकारे 'वाऽवसाने' इति चर्त्वे 'आनक्' इति। चर्त्वाभावे 'आनग्' इति च सिद्धचति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आक्षीत् (ई० ७८)—अञ्ज्धातोर्लुङस्तिपि अनुबन्धलोपे 'इतश्च' इति तिपः इकारलोपे 'आडजादीनाम्' इत्याटि वृद्धौ च्लौ च्लेः सिचि 'अञ्जेः सिचि', इति सिचो नित्यमिटि 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि 'इट ईटि' इति सलोपे सवर्णदीर्घे 'आञ्जीत्' इति सिद्धम् ।

उद्विजिता (ई० ७८)—उत्पूर्वात् विजधातोर्लुटि लुटस्तादेशे तासिप्रत्यये इडागमे अनुबन्धलोपे 'लुटः प्रथमस्य डारौरसः' इति डादेशे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'विज इट्' इति डित्वात् गुणाऽभावे 'उद्विजिता' इति सिद्धम् ।

अरिक्त, अरिचत्, अरैक्षीत् (ई० ७४)—रिच् धातोर्लुङि अडागमे आत्मनेपदवयि तप्रत्यये च्लेः सिचि 'झलो झलि' इति सलोपे 'चोः कुः' इति कुत्वे 'अरिक्त' इति । परस्मैपदे तु इरित्वात् लेरङि 'अरिचत्' इति । अङभावे ईटि 'वदव्रज' इति वृद्धौ कुत्वे षत्वे 'अरैक्षीत्' इति सिद्धम् ।

इन्धे, इन्द्धे (ई० ७६)—इन्ध्–धातोर्लटि तत्स्थाने आत्मनेपदे तप्रत्यये, सार्वधातुकसंज्ञायां शपि प्राप्ते तम्प्रबाध्य 'रुधादिभ्यः श्नम्' इति मित्वादन्त्यादचः परे श्नम्प्रत्यये जाते 'टित आत्मनेपदानां टेरे' इत्यनेन टेरेत्वे 'इनन्धि' इत्यवस्थायां 'श्नान्नलोपः' इति नलोपे 'श्नसोरल्लोपः' इत्यनेनाल्लोपे 'झषस्तथोर्धोऽधः' इत्यनेन तकारस्य धकारे 'झरो झरि सवर्णे' इत्यनेन वैकल्पिके धकारलोपे 'इन्धे' इति सिद्धम् । लोपाभावे तु धस्य जश्त्वे दकारे 'इन्द्धे' इति च सिद्धं भवति ।

नच 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनैवलोपे सतीष्टरूपसिद्धौ 'श्नान्नलोपः' इति सूत्रं व्यर्थमिति वाच्यम्, अनक्तीत्याद्यर्थमावश्यकत्वेन न्याय्यत्वादिहैव प्रतिपादनेन दोषाभावात् ।

अभुनक् (ई० ६०)—'भुज' धातोर्लङि अडागमे तिपि सार्वधातुकसंज्ञायां 'रुधादिभ्यः श्नम्' इति श्यमि हल्ङ्यादिना तलोपे कुत्वे 'अभुनक्' इति सिद्धम् ।

इति रुधादिप्रकरणम् ।

अथ तनादिप्रकरणम्

अतत, अतनिष्ट (ई० ७६)—'तनु' धातोर्लुङि अडागमे अनुबन्धलोपे लुङः स्थाने आत्मनेपदे तादेशे च्लौ च्लेः सिचि 'तनादिभ्यस्तथासोः' इति विभाषया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

 CC-0. In Public Domain. Digitized by eGangotri.Funding: MIDF

सिचो लुकि 'अनुदात्तोपदेशवनततिनोत्यादीनाममनुनासिकलोपे झलि क्ङिति' इत्यनुनासिकनकारस्य लोपे 'अतत' इति। सिज्लोपाभावे सिचः सकारस्य इटि षत्वे 'अतनिष्ट' इति च रूपं सिद्धम्।

असात (ई० ७४)—'षण्' धातुर्लुङि 'धात्वादेः षः सः' इति सत्वे 'निमित्ताऽपाये नैमित्तिकस्याप्यपायः' इति परिभाषया षस्य सत्वे जाते णत्वस्यापि निवृत्तौ आत्मनेपदे लुङस्तादेशे अटि अनुबन्धलोपे च्लौ च्लेः सिचि 'तनादिभ्यस्तथासोः' इति विभाषया सिचो लोपे 'अ सन् त' इति जाते 'अलोन्त्यस्ये'ति सहकारेण 'जनसनखनां सञ्झलोः—' इति नस्यात्वे सवर्णदीर्घे 'असात' इति सिद्धम्।

अक्षत, अक्षणिष्ट (ई० ७६)—'क्षण्' धातोर्लुङि अडागमे तादेशे अनुबन्धलोपे च्लौ च्लेः सिचि 'तनादिभ्यस्तथासोः' इति पाक्षिके सिचो लोपे 'अनुदात्तोपदेशवनततिनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनुनासिकस्य णस्य लोपे 'अक्षत' इति। लुगभावपक्षे सिचः सस्य इटि षत्वे 'अक्षणिष्ट' इति सिद्धम्।

अक्षित अक्षेणिष्ट (ई० ६६)—'क्षिण्' धातोर्लुङि अडागमे तिपि अनुबन्धलोपे च्लिप्रत्यये तस्य सिजादेशे इचावितौ 'आर्धधातुकस्येड्वलादेः' इति इटि 'अस्तिसिचोऽपृक्ते' इत्यनेन च ईडागमे हलन्तक्षणा वृद्धिः प्राप्ता, तस्या 'ह्मन्यन्तक्षणश्वसजागृणिश्व्येदिताम्' इत्यनेन निषेधे लघूपधगुणे 'इट ईटि' सलोपे सवर्णदीर्घे 'अक्षेणीत्' इति भवति।

आत्मनेपदे तु अडागमे तप्रत्यये च्लौ तस्य सिजादेशे इचावितौ 'अक्षिण् स—त' इति स्थिते 'तनादिभ्यस्तथासोः' इत्यनेन सिचो लुकि 'अनुदात्तोपदेशवनततिनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनेन विकल्पेनानुसिकलोपे 'अक्षित' इति रूपं भवति, अनुनासिकलोपाभावे सिचो लुगभावे च इडागमे लघूपधगुणे सस्य षत्वे ष्टुत्वे 'अक्षेणिष्ट' इति सिद्धचति।

तृणोति (ई० ७२)—'तृण्' धातोर्लटि तत्स्थाने तिप्यनुबन्धलोपे 'तनादिकृञ्भ्य उः' इत्यनेन उप्रत्यये तिपः सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इत्यनेन गुणे 'तृणोति' इति सिद्धम्।

कुर्वन्ति (ई० ६७)—धातोर्लटि तत्स्थाने झौ झस्य अन्तादेशे शपं प्रवाध्य 'तनादिकृञ्भ्यः उः' इत्युप्रत्यये 'कृ उ अन्ति' इति जाते 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे 'क र् अन्ति' इति जाते 'अत उत्सार्वधातुके' इति कृञोऽकारस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उत्वे 'इको यणचि' इत्यप्रत्ययसम्बन्धिनः उकारस्य यणि 'हलि च' इति रेफान्तस्योपधायाः दीर्घे प्राप्ते 'न भकुर्छुराम्' इति निषेधे नकारस्यानुस्वारे परसवर्णे कृते 'कुर्वन्ति' इति सिद्धम् । नच नस्य णत्वं कुतो नेति वाच्यम्, परसवर्णस्यासिद्धत्वात् ।

कुर्मः (ई० ७०)—'कृञ्' धातोर्लटि मसि सार्वधातुकसंज्ञायां 'तनादिभ्यस्तथासोः' इत्यनेन सुटि तत आशीर्लिङि तस्स्थाने [illegible] 'डिच्च' इत्यनेन यासुडागमे 'सुट्तिथोः' इति सुटि 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋतो रिङादेशे सलोपे संस्क्रियात् इति ।

आत्मनेपदे तु 'लिङः सीयुट्' इत्यनेन सीयुडागमे यलोपे 'सुट्तिथो' इत्यनेन सुडागमे षत्वे ष्टुत्वे च संस्कृषीष्ट इति भवति ।

नचात्र 'गुणोर्तिसंयोगाद्योः' इत्यनेन गुणः कुतो नेति वाच्यम् 'नित्यं छन्दसि' इत्यतो नित्यमनुवर्त्य नित्यं यः संयोगादिस्तस्येत्यर्थात्सुटि नित्यसंयोगादित्वात् [illegible] 'क्ङिति च' इत्यनेन इडागमः कुतो नेति

अकार्षीत् (ई० ३३)—कृघातोर्लुङि अडागमे तिपि तिप इकारलोपे च्लौ च्लेः सिचि सस्यार्धधातुकत्वादिटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ 'आदेशप्रत्यययोः' इति षत्वे 'अकार्षीत्' इति सिद्धम् ।

संस्करोति (ई० ४३)—सम्पूर्वकात् कृघातोर्लटि तिपि उप्रत्यये ऋकारस्य गुणे इत्याश्रित्यान्परङ्त्वात्सुटि ततो द्वित्वादिकार्ये रूपसिद्धि कृत्वा 'कात्पूर्व' इत्यादि प्रत्याख्यातम् ।

उपस्कृतं ब्रूते (ई० ३८)—अत्र 'उपात्प्रतियत्ने' इति सूत्रेण वाक्याध्याहारार्थं सुट् वाक्याध्याहारेण ब्रूते इत्यर्थः । 'एधोदकस्योपस्कुरुते' इत्यत्र तु प्रतियत्नेऽर्थे सुड् भवति । प्रतियत्नः—गुणाधानमिति मूले ।

परिष्करोति (ई० ३६, ५७)—परिपूर्वककृघातोर्लटि तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपं प्रबाध्य 'तनादिकृञ्भ्य उः' इत्युप्रत्यये 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे उकारस्य च गुणे 'संस्कृतं भक्षाः' इति ज्ञापकात् 'सम्परिभ्यां करोतौ भूषणे' इति अभूषणेऽर्थे 'परिनिविभ्यः—' इति कत्वे 'परिष्करोति' इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पर्यस्कार्षीत् (ई० ७६)—परिपूर्वकात् कृघातोर्लुङि अडागमे तिपि च्लौ च्लेः सिचि 'अस्तिसिचोऽपृक्ते' इति ईटि षत्वे 'वदव्रज–' इति वृद्धौ 'संस्कृतं भक्षाः' इति ज्ञापकात् 'सम्परिभ्यां करोतौ भूषणे' इति अभूषणेऽप्यर्थे सुटि 'सिवादीनां वा' इति विकल्पेन षत्वे यणि पर्यष्कार्षीत् इति । षत्वाभावपक्षे पर्यस्कार्षीत् इति सिद्धयति ।

[illegible] यासोः' इति विभाषया सिचो लोपे 'अ सन् त' इति जाते 'अलोन्त्यस्ये'ति सहकारेण 'जनसनखनां सञ्झलोः–' इति नस्यात्वे सवर्णदीर्घे 'असात' इति सिद्धम् ।

अक्षत, अक्षणिष्ट (ई० ७६)—'क्षण्' धातोर्लुङि अडागमे तादेशे अनुबन्धलोपे च्लौ च्लेः सिचि 'तनादिभ्यस्तथासोः' इति पाक्षिके सिचो लोपे 'अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति' इत्यनुनासिकस्य णस्य लोपे 'अक्षत' इति । लुगभावपक्षे सिचः सस्य इटि षत्वे 'अक्षणिष्ट' इति सिद्धम् ।

अक्षित अक्षेणिष्ट (ई० ६६)—'क्षिण्' धातोर्लुङि अडागमे तिपि अनुबन्धलोपे च्लिप्रत्यये तस्य सिजादेशे [illegible]

सञ्चस्कार (ई० ५७)—करणार्थकात् समुपसर्गकात् 'कृ'–धातोर्लिटि तिपि तस्य णलादेशेऽनुबन्धलोपे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे प्राप्ते परत्वात् 'सम्परिभ्यां करोतौ भूषणे' इत्यनेन सुडागमे च प्राप्ते तत्र 'लिटि धातो'रित्यस्य प्रकृतिप्रत्ययमात्रापेक्षत्वेनाऽन्तरङ्गत्वं, 'सम्परिभ्यामित्यस्य' तु पदद्वयापेक्षत्वेन बहिरङ्गत्वमिति परमपि सुटं बाधित्वा अन्तरङ्गत्वात् द्वित्वे कृतेऽभ्यासादिकार्येऽभ्यासात्पूर्वमेव सुटि प्राप्ते 'सुट्कात्पूर्वः' इत्यनेन 'अडभ्यासव्यवायेऽपि' इति सहकारेण कात्पूर्वमेव सुडागमे सञ्चस्कार इति सिद्धम् ।

भाष्यकृता तु–'पूर्वं धातुरुपसर्गेण युज्यते' इत्याश्रित्यान्तरङ्गत्वात्सुटि ततो द्वित्वादिकार्ये रूपसिद्धिं कृत्वा 'कात्पूर्वः' इत्यादि प्रत्याख्यातम् ।

सञ्चस्करिव (ई० ५६)—करणार्थकसमुपसर्गकात् कृघातोर्लिटि तत्स्थाने वसि तस्य वादेशे 'सुट्कात्पूर्वः' इत्यनेन सुडागमे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे च प्राप्ते 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेने'ति पक्षे धातूपसर्गयोः कार्यस्यान्तरङ्गत्वात्पूर्वं सुडागमे ततः 'स्कृ' इत्यस्य द्वित्वे अभ्याससंज्ञायाम् 'उरत्' इत्यत्वे रपरत्वे 'शर्पूर्वाः खयः' इत्यनेन रेफसकारयोर्निवृत्तौ 'कुहोश्चुः' इति चुत्वे इडागमे 'ऋतश्च संयोगादेर्गुणः' इत्यनेन गुणे रपरत्वे मस्यानुस्वारे परसवर्णे च कृते सञ्चस्करिव इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MDF

नच 'कृसृभृवृस्तुद्रुस्रुवो लिटि' इत्यनेन 'ऋतो भारद्वाजस्य' इत्यनेन चेण्निषेधात्कथमिहडिति वाच्यम्, अत्र सूत्रद्वये च 'कृञोऽसुट्' इति वार्तिककरणेन ससुट्कात्परस्येड्विधानात् ।

संस्क्रियात्, संस्कृषीष्ट (ई० ६८)--संपूर्वकात् कृधातोः 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इति पक्षे अन्तरङ्गत्वात् पूर्वं 'संपरिभ्यां करोतौ भूषणे' इत्यनेन सुटि तत आशीर्लिङि तस्स्थाने तिपि 'यासुट् परस्मैपदेषूदात्तो ङिच्च' इत्यनेन यासुडागमे 'सुट्तिथोः' इति सुटि 'रिङ्शयग्लिङ्क्षु' इत्यनेन ऋतो रिङादेशे सलोपे संस्क्रियात् इति ।

आत्मनेपदे तु 'लिङः सीयुट्' इत्यनेन सीयुडागमे यलोपे 'सुट्तिथो' इत्यनेन सुडागमे षत्वे ष्टुत्वे च संस्कृषीष्ट इति भवति ।

नचात्र 'गुणोर्तिसंयोगाद्योः' इत्यनेन गुणः कुतो नेति वाच्यम् 'नित्यं छन्दसि' इत्यतो नित्यमनुवर्त्य नित्यं यः संयोगादिस्तस्येत्यर्थात्सुटि नित्यसंयोगादित्वाभावेन गुणाप्रवृत्तेः । नचात्र 'ऋतश्च संयोगादेः' इत्यनेन इडागमः कुतो नेति वाच्यम्, अत्र सूत्रे 'एकाच उपदेशेऽनुदात्तात्' इत्यत्र उपदेश इत्यनुवर्त्य उपदेशे यः संयोगादिरिति व्याख्यानेनास्याप्राप्तेः ।

सुट्कात्पूर्वः (ई० ५७)—अधिकारोऽयम् । पारस्करप्रभृतीनि च संज्ञायाम् इति यावत् । ततः इति उत्तरं यद्रक्ष्यामस्तत्र सुडिति कात्पूर्वं इति चैतदधिकृतं वेदितव्यम् इत्यर्थः । ननु 'संपरिभ्यां करोतौ भूषणे' इत्यादौ ककारादेरेव धातोः सुड्विधानेन कात् पूर्वं एव सुड् भविष्यति पुनः कात्पूर्वग्रहणं व्यर्थमिति चेन्न, यथा पंचकं प्रातिपदिकार्थः इति पक्षे प्रत्ययाः तथा भाव कारक-संख्येति चत्वारोर्थाः धातूनामेव । उपसर्गाः प्रत्ययाश्च द्योतकाः इति पक्षे उपसर्गाणामिव प्रत्ययानामपि वाच्यार्थद्योतकत्वे समानेऽपि 'प्रत्ययः' 'अध्ययने' इत्यादि निर्देशैः पूर्वं प्रकृतिप्रत्ययनिमित्तकं, ततः उपसर्गनिमित्तकं, ततः शब्दान्तरनिमित्तकं कार्य भवति इति निर्णीयते । एवं द्वित्वे अटि वा कृते उपसर्गनिमित्तके उपास्किरत, उपचस्कार इत्यादौ सुटि करणीये देशप्रकृल्पृत्यर्थं कात्पूर्वग्रहणमिति सिद्धान्तात् । न चैवं अन्यव्यवधानेऽपि कात्पूर्वः सुट् स्यादिति वाच्यम्, 'अडभ्यासव्यवायेऽपि' इति वार्तिकबलेन अन्यव्यवधाने अप्रवृत्तेः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न च संस्कृषीष्ट इत्यत्र इट्, संस्क्रियात् इत्यत्र गुणः स्यादिति वाच्यम्, कात्पूर्वं इति कथनेन प्रकृत्यनवयवत्ववोधनात् ।

यत्तु भाष्ये पूर्वं वातुरुपसर्गेण युज्यते पश्चात् साधनेनेति पक्षे अन्तरङ्गत्वात् सुटि ततः स्कृ इत्यस्य द्वित्वे 'ऋतश्च संयोगादेर्गुणः' इति गुणे संचस्करतुः इति । कृसृभृवृ इति सूत्रे 'ऋतो भारद्वाजस्येति' सूत्रे च कृञोऽसुट् इति वक्तव्यं इति वार्त्तिकेन ससुट्कात् परस्येटि संचस्करिथ च सिध्यतः । संस्क्रियात् इत्यत्र गुण-वारणाय 'गुणोर्ति'–इति सूत्रे नित्यं छन्दसि इत्यतः नित्यमित्यनुवर्त्य नित्यं यः संयोगादिस्तस्येत्यर्थः करणीयः, तेन सुटि न गुणः । संस्कृषीष्ट इत्यत्र इड्वार-णाय च 'ऋतश्च संयोगादेः' इति सूत्रे 'एकाच उपदेशे' इत्यतः उपदेशे इत्यनुवर्त्य उपदेशे यः संयोगादिः इति सूत्रे व्याख्यास्यते, तेन न दोषः इति कात्पूर्वग्रहणं 'अडभ्यासव्यवायेऽपि' इति वार्तिकं च न कर्तव्यमित्युक्तम्, तस्यैकदेशित्वेनो-पेक्षणीयत्वात्, विप्रकृष्टतरत्वात्, विच्छिन्नत्वात्, तत्सूत्रे विधेयविशेषणत्वाच्च नित्यपदानुवृत्त्यसम्भवात्, समनुकरोति इत्यत्र सुडापत्तेश्चेति दिक् ।

इति तनादिप्रकरणम् ।

अथ क्र्यादिप्रकरणम्

क्रीणन्ति (ई० ७९)—क्रीङ्धातोर्लटि झौ सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य 'क्र्यादिभ्यः श्ना' इति श्नाप्रत्यये 'क्री ना झि' इति स्थिते 'ई हल्यघोः' इतीत्वे प्राप्ते परत्वान्नित्यत्वादन्तरङ्गत्वाच्च झस्य अन्तादेशे 'श्नाभ्य-स्तयोरातः' इत्यालोपे णत्वे क्रीणन्ति इति सिद्धम् ।

प्रमीणाते (ई० ७४)—प्रोपसर्गात् मीङ् धातोर्लटि आत्मनेपदे तप्रत्यये टेरेत्वे शपं प्रबाध्य 'क्र्यादिभ्यः श्ना' इति श्नप्रत्यये अनुबन्धलोपे 'हिनुमीना' इत्यनेन णत्वे 'ई हल्यघोः' इति ईत्वे प्रमीणाते इति सिद्धम् ।

विष्टभ्नाति (ई० ७६)—स्तन्भु–इति सौत्रो धातुः । विपूर्वकस्तन्भ-धातोर्लटि तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि प्राप्ते तं प्रबाध्य 'क्र्या-दिभ्यः श्ना' इत्यनेन श्नाप्रत्यये शकारस्येत्संज्ञायां लोपे च 'अनिदितां हल उपधायाः क्ङिति' इत्यनेन नलोपे 'स्तन्भेः' इत्यनेन षत्वे ष्टुत्वे 'विष्टभ्नाति' इति सिद्धम् ।

व्यष्टभत्, व्यष्टम्भीत् (ई० ७७)—विपूर्वकात् 'स्तन्भ' धातोर्लङि अडा-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गमे तिपि अनुबन्धलोपे तिपः इकारलोपे च्लौ च्ले सिचि प्राप्ते तम्प्रवाध्य 'स्तम्भुस्तुचु' इत्यादिना अङि अनुबन्धलोपे 'वि अस्तन्भ् अ त्' जाते यणि 'अनिदिताम्' इति नलोपे 'स्तन्भेः' इति सस्य पत्वे ष्टुत्वे व्यष्टभत् इति । अङोऽभावे च्लेः सिचि इचि गते 'वि अस्तन्भ स्त्' इति स्थिते यणि सस्य इटि 'अस्तिसिचोऽपृक्ते' इति ईटि अनुबन्धलोपे 'इटि ईटि' इति सलोपे सवर्णदीर्घे स्तन्भेः' इति सस्य पत्वे नस्यानुस्वारे परसवर्णे व्यष्टम्भीत् इति च सिद्धचति ।

विष्कम्भ्नोति (ई० ७४)—विपूर्वकात् स्कम्भातोर्लटि तिपि 'स्तन्भुस्तुन्भु–' इति श्नुप्रत्यये गुणे 'वेः स्कम्नातेर्नित्यम्' इति सस्य पत्वे उक्तं रूपं सिद्धम् । श्नाभपक्षे विष्कम्नाति इति । न च वेः स्कम्नातेः नित्यमिति सूत्रे श्नाविकरणनिर्देशात् यदा श्ना प्रत्ययस्तद्वैषम्यमिति कथं श्नु प्रत्यये पत्वमिति वाच्यम्' शितपा धातुनिर्देशे विकरणस्यावश्यकत्वेन अन्यतरोच्चारणस्य साधुत्वार्थकत्वेन च उभयत्र पत्वे बाधाभावात्'।

स्तभ्नान (ई० ७८)—'स्तन्भ' धातोः लोटि सिपि सिपः सार्वधातुकत्वात् शपि प्राप्ते तमपवाद्य 'स्तम्भु-स्तन्भु–' इत्यादिसूत्रेण चकारात् श्नाप्रत्यये अनुबन्धलोपे सेर्ह्यादेशे 'स्तन्भ ना हि' इति स्थिते 'हलः श्नः शानज्झौ' इति नाशब्दस्य शानजादेशे अनुबन्धलोपे शित्वात्सार्वधातुकत्वेन 'सार्वधातुकमपित्' इति ङित्वे 'अनिदिताम्–' इति धातोर्नस्य लोपे 'अतो हे.' इति हेर्लुकि स्तभ्नान इति सिद्धम् ।

स्तरिषीष्ट, स्तीर्षीष्ट (ई० ७३)—स्तृधातोराशीर्लिङि तङि सीयुटि यलोपे 'सुट् तिथोः' इति सुटि 'लिङ्सिचावात्मनेपदेषु' इति विभाषया इटि 'सार्वधातुकार्धधातुकयोः' इति गुणे रपरत्वे 'स्तरि सी स् त' इति जाते 'वृतो वा' इति इटो दीर्घे प्राप्ते 'न लिङि' इति निषेधे उभयोः सकारयोः पत्वे ष्टुत्वे स्तरिषीष्ट इति । इडभावे तु 'उश्च' इति कित्वाद् गणाभावे 'ऋत इद्धातोः' इति इत्वे रपरत्वे 'हलि च' इति दीर्घे स्तीर्षीष्ट इति ।

अवारीत् (ई० ६०)—'वृङ्' धातोर्लुङि अडागमे इकारलोपे च्लौ च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति सस्य इटि 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि 'सिचि वृद्धिः परस्मैपदेषु' इति वृद्धौ रपरत्वे 'इट ईटि' इति सलोपे सवर्णदीर्घे अवारीत् इति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शशरतुः (ई० ७८)—शृधातोर्लिटि तसि तसोऽतुसि 'शृदृप्रां ह्रस्वो वा' इति ह्रस्वे यणि रत्वे अभ्यासत्वे हलादिः शेषे च कृते इति । ह्रस्वाऽभावे 'ऋच्छत्यृताम्' इति गुणे रपरत्वे शशरतुः इति सिद्धम् ।

आरीत् (ई० ७१)—गत्यर्थकात् ऋधधातोर्लुङि आटि 'आटश्च' इति वृद्धौ तिपि 'इतश्चे'तीकारलोपे च्लौ च्लेः सिचि 'आर्धधातुकस्येड्वलादेः' इति सस्य इटि 'अस्तिसिचोऽपृक्ते' इति तस्य च ईटि' इति सलोपे सवर्णदीर्घे आरीत् इति सिद्धम् ।

जिनाति (ई० ७९)—'ज्या' धातोर्लटि तिप्यनुबन्धलोपे शपमपवाद्य श्नाप्रत्ययेऽनुबन्धलोपे 'ग्रहिज्यावयिव्यधिव्यष्टिविचतिवृश्चतिभृज्जतीनां ङिति च' इत्यनेन सम्प्रसारणे पूर्वरूपे 'हलः' इत्यनेन दीर्घे कृते 'प्वादीनां ह्रस्वः' इत्यनेन ह्रस्वे 'जिनाति' इति सिद्धम् ।

अभान्त्सीत् (ई० ७०)—बन्धधातोर्लुङि अडागमे तिपि इतश्चेतीकारलोपे च्लौ च्लेः सिचि 'वदव्रज–' इति वृद्धौ 'एकाच–' इति वस्य भष्भावेन भत्वे 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि धस्य चर्त्वे अभान्त्सीत् इति सिद्धम् ।

अवान्धाम् (ई० ७८)—'बन्ध' धातोर्लुङि अडागमे तस्प्रत्यये तस्य 'तस्थस्थमिपां तान्तन्तामः' इत्यनेन तामादेशे च्लिप्रत्यये तस्य सिजादेशे 'झलो झलि' इत्यनेन सिज्लोपे 'झषस्तथोर्धोऽधः' इत्यनेन धकारे 'अतो हलादेर्लघोः' इत्यनेन वृद्धौ नलोपे ततो जश्त्वे 'झरो झरी'ति धलोपे च कृते अवान्धाम् इति । न चात्र सिज्लोपात्प्राक् सकारपरकत्वात् 'एकाचो वशो भष् झषन्तस्य स्ध्वोः' इत्यनेन भष्भावः कुतो नेति वाच्यम्, 'पूर्वत्रासिद्धमि'त्यनेन सलोपं प्रत्यसिद्धत्वात् । न चैवमपि प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो दुर्वार एवेति वाच्यम्, प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात् ।

श्रेयुः (ई० ७१)—'श्रन्थ' धातोर्लिटि झिप्रत्यये तस्य 'परस्मैपदानामि'त्यादिना उसादेशे 'अत एकहल्मध्ये' इति सूत्रे भाष्ये 'देभतुः' इत्युदाहरणाच्च एकादेशानुमत्या–'श्रन्थिग्रन्थिदम्भिस्वजीनां लिटः कित्वं वा' इति व्याकरणान्तराश्रयणेन लिटः कित्वे 'अनिदितां हल उपधायाः क्ङिति' इत्यनेनानुनासिकलोपे द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे 'अत एकहल्मध्येऽनादेशादेर्लिटि' इत्यनेन एत्वे अभ्यासलोपे च कृते सस्य रुत्वे विसर्गे श्रेयुः इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इदं च हरदत्तानुसारेण । ये तु कित्वविकल्पमिच्छन्ति तन्मते शश्रन्यतुः, शश्रन्युः, इत्याद्यपि सिद्धयति ।

एषिता (ई० ७८)—'इष' धातोर्लुटि तिपि तासि प्रत्यये 'लुटः प्रथमस्य डारौरसः' इत्यनेन तिपो डादेशे डित्वादभस्याऽपि टेर्लोपे 'आर्धधातुकस्येड्वलादेः' इत्यनेनेडागमे लघूपधगुणे एषिता इति सिद्धम् ।

नच 'तोषसहलुभरुषरिषः' इत्यनेन वकल्पिकः इडागमः कुतो नेति वाच्यम्, अकारावशिष्टसहधातुसाहचर्यादकारविकरणस्य तौदादिकस्यैवेषेर्ग्रहणेन इष्यतीष्णात्योरग्रहणावगमात् । यदि तु श्यन्प्रत्ययवतः इषेस्तकारे परत इड्विकल्पप्रतिषेध इत्यर्थकेन 'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' इति वार्तिकेन इष्णातेरपि ग्रहणमिष्यते तदाऽत्रेड्विकल्प उचित एवेति दिक् ।

खौनाति (ई० ७९)—'खच्' धातोः खव इति वान्तत्वमते लटि तिपि 'क्रयादिभ्यः श्ना' इति शपमपवाद्य श्नाप्रत्यये 'च्छ्वोः शूडू—' इति वस्य ऊठि 'एत्येधत्यूठ्सु' इति वृद्धौ खौनाति इति सिद्धम् ।

खौनीहि (ई० ८०)—खच् धातोः वान्तत्वमते लटि सिपि अनुबन्धलोपे 'क्रयादिभ्यः श्ना' इत्यनेन श्नाप्रत्यये शकारस्येत्संज्ञायां लोपे च सेर्ह्यादेशे 'खव ना हि' इत्यवस्थायां शानचः परत्वात् 'च्छ्वोः शूडनुनासिके च' इत्यनेन वकारस्य ऊठि एत्येधत्यूठ्सु' इत्यनेन वृद्धौ 'ई हल्यघोः' इत्यनेन श्नाप्रत्ययाकारस्य ईत्वे 'खौनीहि' इति रूपम् । न च 'हलः श्नः शानज्झौ' इत्यनेन श्नः शानजादेशः कुतो नेति वाच्यम् वकारस्य ऊठि कृते हल्परकत्वाभावात् ।

ग्रहीता (ई० ७८)—ग्रहधातोर्लुटि तिपि तासि प्रत्यये तिपो डादेशे अनुबन्धलोपे डित्वसामर्थ्यादभस्यापि टेर्लोपे 'आर्धधातुकस्येड्वलादेः' इति ईटि अनुबन्धलोपे 'ग्रहोऽलिटि इति दीर्घे' ग्रहीता इति सिद्धम् ।

गृह्णाण (ई० ७७)—ग्रहधातोर्लोटि सिपि अनुबन्धलोपे शपमपवाद्य 'क्रयादिभ्यः श्ना' इति श्नाप्रत्यये अनुबन्धलोपे 'सेर्ह्यपिच्च' इति सेर्ह्यादेशे शित्वात्सार्वधातुकत्वे 'सार्वधातुकमपित्' इति ङित्वे 'ग्रहिज्ये'ति सम्प्रसारणे पूर्वरूपे 'हलः श्नः शानज्झौ' इति श्नः शानजादेशे शस्येत्संज्ञायां लोपे च कृते नस्य णत्वे 'अतो हेः' इति हेर्लुकि 'गृह्णाण' इति सिद्धम् ।

इति क्रयादिप्रकरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अथ चुरादिप्रकरणम्

चुर स्तेये—अत्र अकारः उच्चारणार्थः, प्रयोजनाभावात्। न च अनुदात्तेत्वं तङर्थं स्यादिति वाच्यम्, 'सत्यापपाश'–इत्यादीना स्वार्थे णिचो विधानात्, अणिचः प्रयोगाभावात्।

चोरयति (ई० ६७)—चुर इत्यस्मात् स्वार्थे 'सत्यापपाश–' इति णिचि अनुबन्धलोपे 'चुर इ' इति स्थिते णिच आर्धधातुकत्वात्तस्मिन् परे 'पुगन्तलघूपधस्य च' इति गुणे णिजन्तस्य चोरि इत्यस्य 'सनाद्यन्ताः–' इति धातुसंज्ञायां लटि शपि 'सार्वधातुके'ति–गुणे अयादेशे चोरयति इति सिद्धम्।

अचूचुरत् (ई० ७४)—चुर इत्यस्मात् 'सत्यापपाश' इति स्वार्थे णिचि अनुबन्धलोपे णिच इकारस्य 'आर्धधातुकं शेषः' इति आर्धधातुकत्वे 'पुगन्तलघूपधस्य च' इति गुणे चोरि इति जाते 'सनाद्यन्ता धातवः' इति धातुत्वाल्लुङि 'लुङ् लङ्'–इत्यडागमे लुङ्स्थाने तिपि च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'चङि' इति द्वित्वे 'पूर्वोऽभ्यासः' इत्यभ्यासत्वे 'हलादिः शेषः' इत्यभ्यासरेफस्य लोपे सन्वद्भावविषये जायमानो दीर्घः सन्वद्भावं नापेक्षत इति सन्वद्भावं विनैव 'दीर्घो लघोः' इत्यभ्यासस्य दीर्घे 'णेरनिटि' इति णिलोपे 'अचूचुरत्' इति। आत्मनेपदपक्षे 'अचूचुरत' इति सिद्धम्।

चिन्त्त इति (ई० ७९)—चिन्त इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे लिङ्गं। तेन चिन्त्यात्, चिन्त्यते इत्यादि सिद्धचति। अन्यथा 'अनिदितां' इति नलोपः स्यात्। इदित्करणे तु नलोपस्याप्रवृत्तेः। णिचः पाक्षिकत्वादेव चिन्तीत्यादि णिज्रहितः प्रयोगः सिद्धचति। एतच्च ज्ञापकं सामान्यापेक्षम्। 'सर्वेऽपि चुरादयः विकल्पेन णिचं लभन्ते' इत्यर्थः। तेन जगाण जगणतुः इति वृत्तिकृतोदाहृतं संगच्छते।

नच 'आवृषाद्वा' इत्यस्य वैयर्थ्यमिति वाच्यम्, 'ज्ञापकसिद्धं न सर्वत्र' इति नियमेन वैयर्थ्याभावात्। एवं च आवृषीयाणामेवैच्छिको विकल्पः अन्येषां तु शिष्टप्रयोगात् व्यवस्थितः। अपरे तु विशेषापेक्षम् इदं ज्ञापकम्। तदा तु 'आवृषाद्वा' इत्यस्य वैयर्थ्यशंकापि नास्ति। न च जगाण जगणतुः इत्यादीनां का

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

गतिरिति वाच्यम्, भ्वादेराकृतिगणत्वेन तत्रत्यधातोः रूपसिद्धेः। यत्रि-मत्रि-तत्रिषु इकारोच्चारणं तु न ज्ञापकम्। यन्त्रेत्यादिपाठेऽपि नस्य अनुपधात्वात् नलोपाप्राप्तेः। चिन्त इति पाठे तु नलोपः स्यादेवेति तस्यैव ज्ञापकत्वमिति दिक्।

अपीपिडत् (ई० ७४)—'पीड्' इत्यस्मात् 'सत्यापपाश–' इति णिचि अनुबन्धलोपे 'सनाद्यन्ताः–' इति णिजन्तस्य धातुसंज्ञायां धातुत्वाल्लुङि अडागमे अनुबन्धलोपे तिपि तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्'इति चङि 'चङि' इति द्वित्वे अभ्यासत्वे हलादिः शेषे अभ्याससम्बन्धिनः ईकारस्य ह्रस्वे 'अपिपीड इ अ त्' इति स्थिते 'भ्राजभासभाषदीपजीवमीलपीडाभन्यतरस्याम्' इति उपधायाः विकल्पेन ह्रस्वे कृते लघुपरकत्वात् 'सन्वल्लघुनि–' इति सन्वद्भावविषये 'दीर्घो लघोः' इत्यनेन अभ्यासस्य दीर्घे 'णेरनिटि' इति णिलोपे अपीपिडत् इति। ह्रस्वाभावपक्षे ह्रस्वपरकत्वाऽभावेन सन्वद्भावविषयत्वाभावात् दीर्घाप्राप्तचा 'अपिपीडत्' इति।

पॄ पूरणे—ननु पॄ इति ह्रस्वोच्चारणेऽपि पारयति इत्यादीनां सिद्धौ दीर्घोच्चारणं व्यर्थमिति चेन्न, दीर्घोच्चारणस्य णिचः पाक्षिकत्वकल्पनायावश्यकत्वात्। तेन परति परतः इति सिद्धयति। कृतं च दीर्घोच्चारणं सेट्कत्वाय भविष्यति। अन्यथा ऊदृदन्तैरिति अनिट्कत्वेन परिता इति न सिद्धयेत्। नच पृणातिपिपर्तिभ्यां परिता इत्यस्य सिद्धौ दीर्घोच्चारणं व्यर्थमिति वाच्यम्, परति परत इति सिद्धये तदावश्यकत्वात्।

अपप्रथत् (ई० ७१)—प्रथ इत्यस्मात् 'सत्यापपाश–' इति णिचि णिजन्तस्य धातुत्वाल्लुङि अडागमे तिपि तिप इकारलोपे च्लौ 'णिश्रि' इति च्लेश्चङि 'चङि' इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'सन्वल्लघुनि–' इति सन्वद्भावे 'सन्यतः' इति अभ्यासाकारस्य इत्वे प्राप्ते तम्प्रवाध्य 'अत्स्मृदृत्वरप्रथम्रदस्तृस्पृशाम्' इत्यकारस्य अत्वे 'णेरनिटि' इति णिलोपे अपप्रथत् इति सिद्धम्।

अपीपृथत् (ई० ६९)—पृथ इत्यस्मात् स्वार्थे णिचि धातुत्वाल्लुङि अडागमे च्लौ 'णिश्रि–' इति च्लेश्चङि 'णेरनिटि' इति णिलोपे प्रत्ययलक्षणेन णिचमाश्रित्य 'पुगन्ते'ति प्राप्तं गुणं बाधित्वा 'उक्रृत्' इत्यनेन ऋकारस्य ऋकारे 'चङि' इति द्वित्वे अभ्यासत्वे हलादिः शेषे सन्वत्वादित्वे 'दीर्घो लघोः' इति दीर्घे अपीपृथत् इति। ऋत्वाभावपक्षे 'द्विर्वचनेऽचि' इति निषेधात् गुणात् प्राग्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वित्वे उरदत्वे हलादिः शेषे प्रत्ययलक्षणेन णित्वमाश्रित्य ऋकारस्य गुणे रपरत्वे अपपर्यत्। नचात्र दीर्घसन्वद्भावौ कुतो नेति वाच्यम्, लघुपरकत्वाभावेन सन्वत्वविरहात् इति।

कथं तुलयति, तुलना इति—नच तुलधातोः लघूपधगुणप्रसंगात् तुलयति, तुलना इत्यदीनामसिद्धिरिति वाच्यं, 'अतुलोपमाभ्यामि'ति निर्देशेन निपातनादङि ततः तुलाशब्दात् णिचि रूपसिद्धेः।

ज्ञपयति (ई० ७८)—ज्ञप् इत्यस्मात् 'ज्ञप मिच्च' इति स्वार्थे णिचि मित्संज्ञायां च सत्यां वृद्धौ 'ज्ञापि' इत्यस्य 'सनाद्यन्तः–' इति धातुसंज्ञायां लिति तिटि शपि 'मितां ह्रस्वः' इति उपधाह्रस्वे गुणे अयादेशे ज्ञपयति इति सिद्धम्।

अचीचहत् (ई० ७४)—चह-इत्यस्मात् स्वार्थे णिच्यनुबन्धलोपे वृद्धौ 'सनाद्यन्तेति' धातुसंज्ञायां लुङि अडागमे तिप्यनुबन्धलोपे च्लिप्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन चङादेशे चङीत्यनेन द्वित्वेऽभ्याससंज्ञायां हलादिः शेषे ह्रस्वे 'मितां ह्रस्वः' इत्यनेनोपधाह्रस्वे णिलोपे 'सन्वल्लघुनि चङ्परेऽनलोपे' इत्यनेन सन्वद्भावे 'सन्यतः' इत्यनेनाभ्यासस्यावर्णस्य इत्वे 'दीर्घो लघोरि'त्यनेन दीर्घे अचीचहत् इति सिद्धम्। कथादौ पठितस्य तु अदन्तत्वेनाग्लोपित्वात् दीर्घसन्वद्भावयोरभावे अचचहत् इति सिद्धयति।

अचचहत् (ई० ७६)—'चह' इत्यस्माञ्णिच्यबन्धलोपे अल्लोपे धातुसंज्ञायां लुङि अडागमे तिपि च्लिप्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यनेन चङादेशे द्वित्वेऽभ्याससंज्ञायां हलादिः शेषेऽग्लोपित्वेन दीर्घसन्वद्भावाभावे, अचचहत् इति। कथादिवहिर्भूतत्वत् 'चह' धातोस्तु अनग्लोपित्वेन दीर्घसन्वद्भावयोः कृतयोः अचीचहत् इति रूपम्।

चपयति (ई० ७९)—चि-इत्यस्मात् 'सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' इत्यनेन स्वार्थे णिचि अनुबन्धलोपे 'चिरफुरोर्णौ' इत्यनेन वैकल्पिके आत्वे 'चाइ' इत्यवस्थायाम् 'अर्त्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुङ् णौ' इति पुगागमे अनुबन्धलोपे चेत्यनुवर्त्य मित्वस्यानुकर्षणेन मित्वाद्ह्रस्वे चयि इत्यस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि तिपि अनुबन्धलोपे सर्वधातुकसंज्ञायां शपि गुणेऽयादेशे 'चपयति' ति सिद्धम्। आत्वाभावपक्षे–णिचि वृद्धौ आयादेशे मित्वादुपधाह्रस्वे चयि इत्यस्य धातुत्वे लटि तिपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शपि गुणेऽयादेशे चपयति इति रूपम् । पक्षे णिचश्चे'ति आत्मनेपदे तु चपयते, चययते इति रूपे ।

कीर्तयति (ई० ७६)—कृत्इत्यस्मात् स्वार्थे णिचि 'सनाद्यन्ताः–' इति धातुत्वाल्लटि तिपि शपि 'उपधायाश्च' इति धातोरुपधाया ऋतः इत्वे रपरत्वे 'उपधायां च' इति दीर्घे 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे कीर्तयति इति सिद्धम् ।

अचीकृतत्-अचिकीर्तत (ई० ७३)—कृत इत्यस्मात् स्वार्थे णिचि धातुत्वाल्लुङि 'लुङ्लङ्–' इत्यडागमे तिपि च्लौ च्लेश्चङि 'उपधायाश्च' इति प्राप्तमित्वमपवाद्य 'उर्ऋत्' इति ऋवर्णस्य उत्वे 'चङि' इति द्वित्वे अभ्यासत्वे उरदत्वे हलादिःशेषे चुत्वे सन्वत्वादित्वे 'दीर्घो लघोः' इति दीर्घे तिप इकारलोपे 'णेरनिटि' इति णिलोपे अचीकृतत् इति । उर्ऋत् इति विकल्पपक्षे 'उपधायाश्च' इति इत्वे रपरत्वे 'उपधायां च' इति दीर्घे 'कीर्त इ अ ति' इति स्थिते द्वित्वे अभ्यासत्वे हलादिः शेषे ह्रस्वे चुत्वे अटि णिलोपे तिपः इकारलोपे अचिकीर्तत् इति सिद्धयति । आत्मनेपदे अचिकीर्तत इति ।

विद्धातो गणभेदेन रूपाणि लिखत (ई० ७४)—ननु विदधातोः विभिन्नगणेषु पाठेन अर्थभेदे च किं रूपं जायते इति चेत् शृणु—

सत्तायां = विद्यते, ज्ञाने = वेत्ति, विन्ते = विचारणे ।
विन्दते, विन्दति = प्राप्तौ श्यन्-लुक्श्नम्शेष्विदं क्रमात् ।
निवासचेतनाख्याने णिचि वेदयते भवेत् ।

इत्थं दिवादौ विद्यते, अदादौ वेत्ति, रुधादौ विन्ते, तुदादौ विन्दते विन्दति, चुरादौ वेदयते इति रूपाणि भवन्ति ।

आमयति (ई० ७८)—'अम् इत्यस्मात् णिचि वृद्धौ आमि' इत्यस्य धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे 'आमयति' इति सिद्धम् ।

अलुलोकत् (ई० ७७)—लोक इत्यस्मात् स्वार्थे णिचि धातुत्वाल्लुङि अडागमे तिपि च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वे अभ्यासत्वे हलादिः शेषे अभ्यासह्रस्वे 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे प्राप्ते 'नाग्लोपि शास्वृदिताम्' इति निषेधे लघुपरकत्वाभावेन सन्वत्त्वविरहात् 'दीर्घो लघोः' इति दीर्घाप्राप्तौ 'णेरनिटि' इति णिलोपे तिप इकारलोपे अलुलोकत् इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलुलोचत् (ई० ७६)—लोच इत्यस्मात् 'सत्यापपाशे'–त्यादिना स्वार्थे णिचि लघूपधगुणे लोचीत्यस्य धातुसंज्ञायां धातुत्वाल्लुङि अडागमे च्लिप्रत्यये तस्य 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' इति चङादेशे 'चङि' इति द्वित्वे अभ्याससंज्ञायां हलादिःशेषे अभ्यासह्रस्वे 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे प्राप्ते 'नाग्लोपिशास्वृदिताम्' इत्यनेन तन्निषेधे उपधाह्रस्वाभावावेन लघुपरकत्वात् 'दीर्घो लघोः' इति दीर्घाप्राप्तौ 'णेरनिटि' इति णिलोपे अलुलोचत् इति सिद्धम्।

गणानां क्रमिकत्वे किं मानम् (ई० ६६)—ननु गणानां यः क्रमः धातुपाठे सिद्धान्तकौमुद्यां च निर्दिष्टः तत्र किम्मानम् इति चेत् शृणु–धातुपाठक्रमेण तत्तद्गणे विकरणविधायकसूत्रे क्रमेण च नामक्रमयोः ग्रहणस्यैव मानत्वात्। न च दशमस्य चुरादिगणसूत्रस्य 'दिवादिभ्यः श्यन्' इत्यतः पूर्वपाठेन चुरादिगणस्य दशमत्वमनुपपन्नमिति वाच्यम्, धातुपाठे सामान्यधातुपाठात् परं णिजन्तधातोः पाठेन चुरादेः भ्वादिपरिशिष्टत्वात् च पश्चात् निर्देशस्य उचितत्वात्। अतएव नवगणी इति प्रसिद्धिः इति दिक्।

धूनयति (ई० ६६)—धूञ् इत्यस्मात् स्वार्थे णिचि धातुत्वाल्लटि तिपि शपि 'धञ्प्रीञोर्नुक् वक्तव्यः' इति वार्तिकेन नुकि गुणे अयादेशे धूनयति इति सिद्धम्।

धूञ् धातोर्गणभेदेन रूपाणि (ई० ७८)—स्वादौ चायं धूञ् कम्पने इति पठितः तत्र–'धुनुते' इति। दीर्घान्तोऽप्ययं धातुस्तन्मते–धूनोति, धूनुते, इति रूपे। 'धू' विधूनने तुदादौ पठितः। तस्य च 'धुवति' इति रूपम्। 'धूञ् कम्पने' इति क्र्यादौ पठितः–तस्य धूनाति, धूनीते इति रूपे। अत्रार्थे एव चुरादौ पठितः–तत्र धूनयति, धवते इति। मतान्तरेण 'धावयति' इति रूपम्। तथाचोक्तं कविरहस्ये—

धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च ॥ इति ॥

कथयति (ई० ६७)—अजन्तात् कथ इत्यस्मात् 'सत्यापपाशे' ति स्वार्थे णिचि तस्यार्धधातुकत्वेन 'अतो लोपः' इति अल्लोपे 'अत ऊपधायाः' इति प्राप्तायाः वृद्धेः 'अचः परस्मिन्' इत्यल्लोपस्य स्थानिवद्भावेन निषेधे धातुत्वाल्लटि तिपि शपि 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे कथयति इति सिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अचकथत् (ई० ७८)—अजन्तात् कथ इत्यस्मात् 'सत्यापपपाशे'ति स्वार्थे णिचि तस्यार्धधातुकत्वेन 'अतो लोपः' इत्यल्लोपे तस्य स्थानिवद्भावात् उपधावृद्ध्यभावे धातुत्वाल्लुङस्तिपि अडागमे अनुबन्धलोपे 'इतश्चे'ति तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि अनुबन्धलोपे 'णेरनिटि' इति णिच इकारलोपे 'चङि' इति द्वित्वेन अभ्यासत्वे 'हलादिः शेषे' चुत्वे अग्लोपित्वात्सन्वद्भावाऽभावेन दीर्घाऽभावे अचकथत् इति सिद्धम् ।

अजीगणत् (ई० ७६)—अजन्तात् गण इत्यस्मात् 'सत्यपपाशे'ति सूत्रेण स्वार्थे णिचि णिचः आर्धधातुकत्वेन 'अतो लोपः' इत्यल्लोपे तस्य स्थानिवत्त्वात् वृद्ध्यभावे धातुत्वाल्लुङि अडागमे तिपि अनुबन्धलोपे 'इतश्चे'ति तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि 'णेरनिटि' इति णिच इकारलोपे द्वित्वे अभ्यासत्वे हलादिः शेषे 'कुहोश्चुः' इति अभ्यासगकारस्य चुत्वेन जकारे 'अज गण् अ त्' इति स्थिते अग्लोपित्वाद् दीर्घसन्वद्भावयोरभावे 'ई च गणः' इति ईत्त्वे अजीगणत् इति । पक्षे अजगणत् इति ।

असुसूचत् (ई० ८२)—सूच इत्यस्मात् णिचि अतो लोपे सूचि इत्यस्य धातुसंज्ञायाम् लुङि अटि तिपि 'इतश्चे'तीकारलोपे च्लौ चङि द्वित्वे अभ्यासत्वे हलादिः शेषे अभ्यासस्य ह्रस्वे अल्लोपस्य स्थानिवत्त्वात् उपधाह्रस्वत्वाभावे णिलोपे अग्लोपित्वेन दीर्घसन्वद्भावयोरभावे असुसूचत् इति सिद्धम् । नचात्र षत्वं कुतो नेति वाच्यम् । अषोपदेशत्वेन आदेशसकाराभावात् षत्वाप्राप्तेः । अत्र सर्वत्र पुस्तके असूसुचत् इति पाठः मुद्रितः प्रामादिक एव ।

औननत् (ई० ७७)—'ऊन परिहाणे' इत्यस्माद् स्वार्थे णिचि धातुत्वाल्लुङि आडागमे तिपि 'आटश्चे'ति वृद्धौ च्लिप्रत्यये णिश्रि–' इति च्लेश्चङि 'चङि' इति अजादेर्द्वितीयस्य इति नशब्दस्य द्वित्वे अभ्यासत्वे 'अतो लोपः' इत्यल्लोपे अग्लोपित्वेन सन्वद्भावाऽभावाद् अभ्यासस्य ईत्त्वदीर्घयोरभावे 'णेरनिटि' इति णिलोपे तिप इकारलोपे औननत् इति सिद्धम् ।

ननु ऊनधातोर्णिच अन्तरङ्गत्वादतो लोपे धातुत्वाल्लुङि तिपि आडागमे च्लौ चङादेशे निशब्दस्य द्वित्वेऽभ्यासे अकारश्रवणं कथमिति चेन्न; शियविषति, पिपविषतीत्येतदर्थे 'पययोरि'ति वक्तव्ये 'ओः पुयण्ज्यपरे' इति सूत्रे वर्गप्रत्याहारग्रहणेन, णिचि अच आदेशो न द्वित्वे कर्तव्ये' इति ज्ञापनात् द्वित्वात् पूर्वमतो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोपाभावेनादोषात्। न चैवं कृतधातोर्णिचि लुङादौ 'उपधायाश्चे' तीत्वाप्राप्त्या अचिकीर्तदिति न स्यादिति वाच्यम्, ज्ञापकसाजात्यात् यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णो लभ्यते, तत्रैवोक्तनिषेधः प्रवर्तत इति कल्पनेनादोषात्। एवं च कृते नशब्दस्य द्वित्वे तत उत्तरखण्डेऽल्लोपे अनौनदिति सिद्धमिति दिक्।

प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च (ई० ६८)—प्रातिपदिकात् धात्वर्थे बहुलं णिच् स्यात् इष्ठे यथा प्रातिपदिकत्व-पुंवद्भाव-रभाव-टिलोप-विन्-मतुप् लोपयणादिलोप-प्रस्थस्फाद्यादेश-भसंज्ञास्तद्वण्णावपि स्युः इत्यर्थः। तेन पटुमाचष्टे इति विग्रहे पटुशब्दात् 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति णिचि इष्ठवदतिदेशे च कृते तेन टिलोपे धातुसंज्ञायाम् लटि तिपि शपि गुणे अयादेशे पटयति इति सिद्धम्।

'ओः पुञ्ण्ज्यपरे' इति सूत्रे वर्गप्रत्याहारजग्रहो लिङ्गमिति (ई० ७४)—ननु 'ओः पुयण्ज्यपरे' इति सूत्रस्य पिपावयिषति, विभावयिषति, यियावयिषति, रिरावयिषति, लिलावयिषति, जिजनावयिषति, इत्युदाहरणेषु द्वित्वम्प्रत्यनिमित्ते णिचि 'द्विर्वचनेऽचि' इति 'निषेधाऽप्रवृत्त्या द्वित्वात्प्रागेव परत्वात् वृद्ध्यावादेशयोः कृतयोरभ्यासेऽवाकारस्य ह्रस्वे 'सन्यतः' इत्यनेनैवेत्त्वसिद्धेः पिपावयिषति, यियावयिषतीत्यत्रोक्तरीत्या 'सन्यत' इतीत्वसिद्धावपि पिपविषति, यियविषतीत्यत्र पूङ्धातोश्चाण्यन्तात् सनि अभ्यासे इत्त्वार्थं तदावश्यकत्वेन 'ओः पयोरि'त्येव सूत्रमस्तु पवर्ग-यण्प्रत्याहार-जकारग्रहणं व्यर्थम् इति चेत् सत्यम्।

वर्गप्रत्याहारजकारग्रहणं व्यर्थं सत् ज्ञापकम् भविष्यति। 'णिच्यच आदेशो न स्यात् द्वित्वे कर्तव्ये' इति। तेन विभावयिषतीत्यादिषु णिचि लुप्ते 'चङि' इति द्वित्वे कर्तव्ये प्रत्ययलक्षणमाश्रित्य णिचि गुणावादेशयोः प्रतिषेधे उवर्णान्तानां द्वित्वेऽभ्यासेऽकाराभावेन 'सन्यत' इत्यस्याप्रवृत्त्या वर्गप्रत्याहारजकारग्रहणं स्वांशे चरितार्थः। ज्ञापनफलन्तु-तुतावयिति, अतूतवत्, ऊर्णुनावयिषति, और्णुनवत्, पुस्फारयिषति अपुस्फुरदित्यादिसिद्धिः।

अश्वयति (ई० ६०)—अश्वेन अतिक्रामति इति विग्रहे 'तेनातिक्रमति' इति गणसूत्रेण प्रातिपदिकात् धात्वर्थे णिचि इष्टवद्भावेन टिलोपे च कृते प्यन्यस्य धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे अश्वयति इति सिद्धम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अपीपटत् अपपटत् (ई० ७०)—पटु इत्यास्मत् प्रातिपदिकात् पटुमाचष्ट इति विग्रहे णिचि इष्ठवद्भावे तेन टिलोपे प्राप्ते परत्वात् 'अचो ञ्णितीति' वृद्धौ आवादेशात् प्रागेव परत्वात् 'वार्णादाङ्गं बलीयः' इति नियमाद्वा टिलोपे पटि इत्यस्य धातुसंज्ञायाम् लुङि अडागमे तपि इकारलोपे शपं प्रबाध्य च्लौ चङि द्वित्वे अभ्यासस्वे हलादिः शेषे अनग्लोपित्वात् सन्वद्भावे इत्वे दीर्घे णेनिटि इति टिलोपे अपीपटत् इति । स्पष्टं चेदं मुण्डमिश्रेति भाष्यकैयटयोः ।

अन्ये तु णौ चङि इति भाष्योक्तेन 'वृद्धेर्लोपो बलीयान् इति सिद्धान्तेन वृद्धेः पूर्वं टिलोपे अग्लोपित्वात् सन्वद्भावाप्राप्तौ अपपटत् इत्येव रूपम् । अस्मिंश्च पक्षे 'मुण्डमिश्र' इति सूत्रे हलिकल्योरदन्तत्वनिपातनस्य वैयर्थ्यमेव । वृद्धेः प्राक् टिलोपे सति अग्लोपित्वसम्भवात् । अतः अदन्तत्वनिपातनसामर्थ्यात् टिलोपात् पूर्वं वृद्धिरेव इति पक्ष एव उचितः । अन्येतु भाष्ये उभयविधरूपदर्शनेन उभयोरपि साधुत्वमेव इति वदन्ति ।

तत्करोति तदाचष्टे (ई० ६०)—तत्करोति तत् आचष्टे इत्यर्थे प्रातिपदिकात् णिच् स्यादित्यर्थः । न च करोति आचष्टे इति कर्तरि वर्तमाने लडेकवचनम् । तस्मिन् अर्थे प्रत्ययो भूतभविष्यतोः द्विवचनबहुवचनयोश्च णिच् प्रत्ययो न स्यादिति वाच्यम्, अत्र धात्वर्थमात्रं णिजर्थः, लडर्थस्तु अविवक्षितः, तेन भूतभविष्यतोः द्वित्वबहुत्वयोश्च प्रत्ययो भवत्येव । यद्यपि एकत्वादिसंख्या न लडर्थः किन्तु तिङर्थः तथापि लडादेशः तिङर्थोऽपि अत्र लडर्थत्वेन उक्त इत्यदोषात् ।

आख्यानात्कृतस्तदाचष्टे कृल्लुक् (ई० ७०)—आख्यानात्-कृदन्तात् णिज् वक्तव्यः तदाचष्ट इत्यस्मिन्नर्थे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम् भवति इत्यर्थः । आख्यानं वृत्तकथा प्रबन्धः । कृल्लुक्-कृत्प्रत्ययस्य लुक्, प्रकृतिप्रत्यापत्तिः-तस्यैव कृतः या प्रकृतिः हनादिधातुरूपा, तस्याः प्रत्यापत्तिः आदेशादिविकारपरित्यागेन स्वरूपेणावस्थानम् । कारकञ्च-चात्कार्यम्, हेतुमण्णिचः प्रकृते र्हनादेर्हेतुमण्णौ यादृशं कारकं धातावन्तर्भूतं द्वितीयान्तं यादृशञ्च कार्यं कुत्वतत्वादि तदिहापीत्यर्थः । कंसववमाचष्टे कंसं घातयतीत्युदाहरणम् ।

कंसमजीघतत् (ई० ६७)—कंसवधमाचस्टे इत्यर्थे कंसववशब्दात् 'आख्यानात् कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारम्' इति 'कंस हन्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इत्यस्य णिचि' धातुसंज्ञायाम् लुङि तिपि च्लेश्च्लि 'चङि' इति द्वित्वे पूर्वस्याभ्याससंज्ञायां 'हलादिः शेषे' 'कुहोश्चुः' इति चुत्वे 'हनस्तोऽचिण्णलोः' इति तकारेऽन्तादेशे 'हो हन्तेः' इति हकारस्य धकारे अटि सन्वद्भावे 'सन्यतः' इतीत्वे 'दीर्घो लघोः' इति दीर्घे 'इतश्च' इतीकारलोपे रूपं सिद्धम् ।

ननु कंसवधशब्दाद् णिचि कृते कंसवधशब्दस्याङ्गसंज्ञाधातुसंज्ञा च भवति । ततः कंसवधशब्दात्पूर्वमडागमः कंसशब्दस्य द्वित्वञ्च भवितुमर्हति । एवं 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति परिभाषया कुत्वे तत्त्वे न भवतस्तन्न, प्रकृतिवच्चेति चकारो भिन्नक्रमः । कारकं चात्कार्यम् । हेतुमण्णिचः प्रकृतेर्हन्यादेर्हेतुमण्णौ यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशञ्च कार्यं कुत्वतत्त्वादि तदिहापीत्यर्थात् । अत्र 'हनश्च वधः' इति अप् प्रत्ययो वधादेशश्चेति दिक् ।

असीषमत् (ई० ६४)—'साम सान्त्वने' इति कथादेः प्राक् चुरादौ पठितस्य रूपम् । तद्धि-'साम्' धातोर्णिचि धातुसंज्ञायां लुङि अडागमे तिपि इपावितौ इतश्चेतीकारलोपे च्लौ 'णि श्रि द्रु स्रु भ्यः कर्तरि चङ्' इति च्लेश्चङि द्वित्वे अभ्याससंज्ञायां 'ह्रस्वः' इत्यभ्यासस्याऽकारस्य ह्रस्वे हलादिः शेषे 'सन्यत' इति इत्वे 'दीर्घो लघोः' अभ्यासस्य दीर्घे 'णेरनिटि' इति णिलोपे षत्वे असीषमत् इति ।

यद्यपि 'साम सान्त्वप्रयोगे' इत्येव कथादौ पठितः, न तु 'साम् सान्त्वने' इति चुरादौ क्वापि दृश्यते तथापि सान्त्वनस्य सामप्रयोगादनन्यत्वात्तथोक्तिरिति सरस्वती ।

असयति (ई० ७८)—'असिना हन्ति' इति विग्रहे 'कर्तृकरणाद्धात्वर्थे' इति गणसूत्रेण प्रातिपदिकात् धात्वर्थे णिचि इष्ठवद्भावेन टिलोपे च कृते ण्यन्तस्य धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे असयति इति सिद्धम् ।

बहुलमेतन्निदर्शनम्—कथादीनामदन्तधातूनिदर्शनम् बहुलम् इत्यर्थः तेन बाहुलकादन्येऽपि धातवः अदन्ता परिगणितुं शक्याः । अन्ये तु दशगणीपाठो बहुलम् इत्याहुः । तन्मते अपठिता अपि सौत्रलौकिकवैदिकाः धातवो बोध्याः । अपरे पुनः नवगणीपाठो बहुलमिति वदन्ति । तन्मते अपठितेभ्योऽपि क्वचित् स्वार्थे णिच् इति बोध्यम् । तेन रामो राज्यमचीकरत् इति प्रयोगः सम्पद्यते ।

रामो राज्यमचीकरत् (ई० ५२)—'बहुलमेतन्निदर्शनम्' इति गणसूत्रस्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बहुलग्रहणेन चुरादिभिन्नाः उदाहृताः ये नव गणास्तेभ्योऽपि स्वार्थे णिच्, इति केचित् वदन्ति, तन्मते कृ धातोः लुङि प्रथमपुरुषैकवचने 'अचीकरत्' इति रूपं बोध्यम् ।

सिद्धशब्दो मङ्गलार्थ—'पुच्छादिषु धात्वर्थं इत्येव सिद्धम्' । इति गणपाठान्ते सिद्धशब्दः मङ्गलार्थ इति तात्पर्यम् । नच चुरादिप्रकरणान्ते न ग्रन्थान्तः इति ग्रन्थान्ते इति कथमिति वाच्यम्, धातुपाठग्रन्थस्य समाप्तत्वात् मङ्गलार्थं सिद्धशब्दस्यौचित्यात् ।

इति चुरादिप्रकरणम् ।

अथ ण्यन्तप्रकरणम्

इति उपधाह्रस्वे 'णेरनिटि' इति णिलोपे, 'चङि' इति चुर इत्यस्य द्वित्वे अभ्यासत्वे हलादिः शेषे 'सन्वल्लघुनि—' इति सन्वद्भावविषयत्वाद् 'दीर्घो लघोः' इति दीर्घे अचूचुरत् इति सिद्धम् ।

ननु उपधाह्रस्वः अभ्यासदीर्घश्चेति द्वयमपि चङ्परे णौ विहितम् । न च उभयमप्यत्र प्रत्ययलक्षणेन प्रथमणिचमादाय सम्भवति इति वाच्यम्, तस्य द्वितीयणिचा व्यवहितत्वेन चङ्परकत्वाभावात् । नच द्वितीयणिचमादाय तदुभयोः सम्भव इति वाच्यम्, द्वितीयणिच्प्रकृतेः प्रथमण्यन्तस्य णिलोपमादाय [illegible] 'णावित्यस्य चङपरकणित्वजात्या-

कर्तरि तृतीया, अनुक्ते कर्मणि च द्वितीया भवति ।

ण्यन्ते प्रयोज्यः कर्ता प्रयोजकश्च कर्ता इति कर्तृद्वयं भवति । तत्र प्रेषणादिरूपप्रयोज्यव्यापारे वाच्यत्वेन विविक्षिते धातोर्णिच् प्रत्ययो भवतीत्यर्थकेन 'हेतुमति चे'ति सूत्रेण प्रयोजके कर्तरि णिच् प्रत्ययविधानात् प्रयोजकः कर्ता उक्तः, प्रयोज्यश्च कर्ता अनुक्तः । तत्र सर्वत्र तृतीयाप्राप्तौ 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामपि कर्ता स णौ' इत्यनेन सूत्रेण गत्यर्थक-बुद्ध्यर्थकशब्दकर्मकाकर्मकाणां धातूनां प्रयोज्यकर्तुः कर्मसंज्ञा भवति णिच्प्रत्यये सति । एतेन अकर्मकधातुभ्यः प्रयोज्यकर्तुः कर्मसंज्ञा विधीयते । एवमेव यदर्थं प्रत्ययः तदधीना क्रिया । यदि प्रयोजके कर्तरि युष्मदस्मद्भ्यां भिन्ने प्रथमपुरुषः, युष्मदि मध्यमपुरुषः, अस्मदि उत्तमपुरुषः । प्रयोजकस्य कर्तुः एकत्वेन, द्वित्वेन, बहुत्वेन वा विवक्षिते एकवचनद्विवचनबहुवचनानि । यथा-देवदत्तः भवति भवन्तं यज्ञदत्तः प्रेरयति, अत्र प्रयोज्यः कर्ता देवदत्तः, प्रयोजकः कर्ता यज्ञदत्तः, तत्र प्रयोजके

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कर्तरि णिचि तस्य उक्तत्वात् ततो प्रथमा। प्रयोज्यः कर्ता देवदत्तः कर्तुरनुक्तत्वात् कर्तृकरणयोस्तृतीया इति तृतीयायाः प्राप्तौ 'गतिबुद्धि' रिति सूत्रेण भूधातोरकर्मकत्वात् कर्तुः कर्मसंज्ञायां यज्ञदत्तः देवदत्तं भावयति इति रूपम्। सकर्मकधातुस्थले तु यज्ञदत्तः देवदत्तेन तण्डुलं पाचयति इति रूपम्। एवं प्रयोजकस्यापि प्रयोजकान्तरे मुख्ये प्रयोजके णिचि अप्रधाने प्रयोजके सर्वत्र तृतीयैव। तेन विष्णुमित्रः यज्ञदत्तेन देवदत्तं भावयति इति अकर्मकस्थले प्रयोगः।

भावयति (ई० ८०)—देवदत्तः भवति भवन्तं तं यज्ञदत्तः प्रेरयति इति भूधातोः 'हेतुमति च' इति णिचि वृद्धौ अवादेशे भावि इत्यस्य णिजन्तत्वात् धातुत्वेन लटि तिपि शपि गुणे अयादेशे भावयति इति सिद्धम्।

तदिहापीत्यर्थात्। अत्र 'हनश्च वधः' इति अप् प्रत्ययो वधादेशश्चेति दिक्।

असीषमत् (ई० ६४)—'साम सान्त्वने' इति कथादेः प्राक् चुरादौ पठितस्य रूपम्। तद्धि-'साम्' धातोर्णिचि धातुसंज्ञायां लुङि अडागमे तिपि इपावितौ इतश्चेतीकारलोपे च्लौ 'णि श्रि द्रु स्रु भ्यः कर्तरि चङ्' इति च्लेश्चङि द्वित्वे अभ्याससंज्ञायां 'ह्रस्वः' इत्यभ्यासस्याऽकारस्य ह्रस्वे हलादिः शेषे 'सन्यत' इति इत्वे 'दीर्घो लघोः' अभ्यासस्य दीर्घे 'णेरनिटि' इति णिलोपे षत्वे असीषमत् इति।

अवीभवत् (ई० ६०)—भूधातोः 'हेतुमति च' इति हेत्वर्थे णिचि 'णिच्यच आदेशो न द्वित्वे कर्तव्ये' इति निषेधात् पूर्वं वृद्धयभावे धातुत्वाल्लुङ्स्तिपि 'लुङ्लङ्'-इडागमे च्लौ 'णिश्रिद्रुस्रुभ्यः-' इति च्लेश्चङि 'णेरनिटि' इति णिलोपे वृद्धौ 'चङि' इति द्वित्वे अभ्यासत्वे ह्रस्वे 'अभ्यासे चर्च' इति जश्त्वे प्रत्यय-लक्षणेन वृद्धौ अवादेशे 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'ओः पुयण्ज्यरे' इत्यभ्यासोकारस्य इत्वे 'दीर्घो लघोः' इति दीर्घे अवीभवत् इति सिद्धम्।

अपीपवत् (ई० ७४)—'पूङ्' धातोः 'हेतुमति च' इत्यनेन णिचि अनुबन्धलोपे पू इ इति स्थिते 'द्विर्वचनेऽचि' इति निषेधात् वृद्धयभावे 'सनाद्यन्ता धातवः' इति ण्यन्तस्य धातुसंज्ञायां 'लुङ्-लङ् लृङ्क्ष्वडुदात्तः' इति अडागमे तिपि इपावितौ 'च्लि लुङि' इति च्लौ 'णि श्रिद्रु-स्रुभ्य' इति च्लेश्चङादेशे अनुबन्धलोपे 'चङि' इत्यनेन द्वित्वे उत्तरखण्डस्य वृद्धयवादेशयोः कृतयोः 'अपू पाव इ अत्'

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति स्थिते 'णेरनिटि' इत्यनेन णिलोपे 'णौ चङ्यपधाया ह्रस्वः' इत्यनेन उपधाह्रस्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याप्राप्त्या 'ओः पुयण्ज्यपरे' इत्यनेन अभ्यासोकारस्य इकारे सन्वद्भावविषयत्वात् 'दीर्घो लघोः' इति दीर्घे अपीपवत् इति सिद्धम् ।

अचूचुरत् (ई० ८०)—चुरधातोः स्वार्थे णिचि उपधागुणे 'चोरि' इत्यस्मात् 'हेतुमति च' इति हेतुमण्णौ 'चोरि इ' इति स्थिते 'ण्यल्लोपावियङ्उवणगुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन' इति परत्वात् प्राप्तामपि वृद्धि बाधित्वा णिलोपे ण्यन्तस्य 'सनाद्यन्ताः–' इति धातुत्वाल्लुङि अडागमे तिपि तिप इकारलोपे च्लौ 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इति च्लेश्चङि 'णौ चङ्युपधाया ह्रस्वः' इति उपधाह्रस्वे 'णेरनिटि' इति णिलोपे, 'चङि' इति चुर इत्यस्य द्वित्वे अभ्यासत्वे हलादिः शेषे 'सन्वल्लघुनि–' इति सन्वद्भावविषयत्वाद् 'दीर्घो लघोः' इति दीर्घे अचूचुरत् इति सिद्धम् ।

ननु उपधाह्रस्वः अभ्यासदीर्घश्चेति द्वयमपि चङ्परे णौ विहितम् । न च उभयमप्यत्र प्रत्ययलक्षणेन प्रथमणिचमादाय सम्भवति इति वाच्यम्, तस्य द्वितीयणिचा व्यवहितत्वेन चङ्परकत्वाभावात् । नच द्वितीयणिचमादाय तदुभयोः सम्भव इति वाच्यम्, द्वितीयणिच्प्रकृतेः प्रथमण्यन्तस्य णिलोपमादाय अग्लोपित्वादिति चेन्न, 'चङ्परे णौ' इत्यत्र णावित्यस्य चङ्परकणित्वजात्याश्रयैकाऽनेकणिज्व्यक्तिपरकत्वेन विविक्षितत्वात् । तथा च णिद्वयस्य चङ्परकत्वाभावेऽपि णित्वस्य चङ्परकत्वेन ह्रस्वदीर्घयोः प्रवृत्तेरिति दिक् ।

अचीचकासत्, अचचकासत् (ई० ७९)—चकासृ इत्यस्माण्णिचि तदन्ताल्लुङि 'लुङ्-लङ्' इत्यडागमे तिपि इपावितौ 'इतश्चेती'कारलोपे च्लौ तस्य 'णि श्रि द्रु स्रु भ्यः कर्तरि चङ्' इति चङादेशे 'चङि' इति द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'कुहोश्चुः' इति चुत्वे 'णेरनिटि' इति णिलोपे चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरः इत्यर्थपक्षाश्रये 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'सन्यतः' इति इत्वे 'दीर्घो लघोः' इति दीर्घे अचीचकासत् इति । 'अङ्गं यत्र द्विरुच्यते' इति मते अर्थात् 'सन्वल्लघुनी' त्यस्य चङ्परे णौ यल्लघु तत्परो योऽङ्गस्य अभ्यासः इत्यर्थपक्षे सन्वद्भावाऽभावात् इत्वदीर्घयोरप्राप्तौ 'अचचकासत्' इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

णौ च संश्चङोरिति (ई० ४७)—इदं सूत्रं णिजन्तप्रक्रियायामेवोभयविधं पठितम् । तच्च षष्ठाध्यायप्रथमपादस्थं प्रथमम् । सन्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वा स्यादित्यर्थः । 'अशूशवत-अशिश्वयत्' इत्युदाहरणे । अपरं द्वितीयाध्यायचतुर्थपादस्थम् । सन्परे च णौ इङो गाङ् वा स्यादित्यर्थः । अध्यजीगपत्-अध्यापिपत्' इत्युदाहरणे ।

अशूशवत् (ई० ८०)—श्विधातोः हेतुमण्णौ ण्यन्तस्य 'सनाद्यन्ता—' इति धातुत्वाल्लुङि अडागमे तिपि इकारलोपे च्लौ 'णिश्रि—' इति च्लेश्चङि 'अश्वि इ अ त्' इति स्थिते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति भाष्यात् वृद्ध्यायादेशौ प्रबाध्य 'णौ च संश्चङोः' इति सम्प्रसारणे पूर्वरूपे 'शु' इत्यस्य 'चङि' इति द्वित्वे उत्तरखण्डस्य णिचमाश्रित्य वृद्धचवादेशयोः उपधाह्रस्वे सन्वद्भावविषयाद् 'दीर्घो लघोः' इत्याभ्यासदीर्घे अशूशवत् इति । अत्र अलघुत्वात् सन्वद्भावाप्रवृत्तेः दीर्घो नेति दिक् ।

न्यसीषहत्, न्यषीषहत् (ई० ४९)—'नि' उपसर्गात् 'षह मर्षणे' अस्माद् धातोर्णिचि लुङि अटि तिपि 'इतश्चे'तीकारलोपे च्लौ चङि द्वित्वे अभ्यासत्वे हलादिः शेषे सन्वत्त्वे इत्वे दीर्घे णिलोपे यणि षत्वे 'न्यसीषहत्' इति रूपं भवति । 'न्यषीषहत्' इति त्वसाध्वेव, 'परिनिविभ्यः' इत्यनेन उपसर्गस्यनिमित्तात्परत्वे प्राप्तस्य षत्वस्य 'स्तन्भुसिवुसहां चङि' इत्यनेन निषेधात् ।

मा भवानिदिधत् (ई० ७८)—एधृधातोर्णिचि ण्यन्तस्य धातुत्वाल्लुङि तिपि च्लेश्चङि 'एध् इ अ त्' इति स्थिते पूर्वम् उपधाह्रस्वे ततो 'धी' त्यस्य द्वित्वे अभ्याससंज्ञायां हलादिः शेषे माङ्योगादडागमाभावे 'मा भवानिदिधत्' इति । नचात्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अन्तरङ्गत्वात् द्वित्वमेव ह्रस्वात् पूर्वं स्यादिति वाच्यम्, ओणेर्ऋदित्करेण बहिरङ्गस्याप्युपधाह्रस्वस्य प्राबल्यबोधनात् ।

तथाहि-यदि उपधाह्रस्वात् प्रागेव अन्तरङ्गत्वात् द्वित्वं स्यात्तदा 'ओण इ ऋ त्' इति स्थिते णिशब्दस्य द्वित्वे 'णौ चङ्युपधाया' इति ह्रस्वे कर्तव्ये चपरकोङ् यो णिस्तदव्यवहितमङ्गम् 'ओणिण्' इति तस्योपधाया दीर्घाभावेन ह्रस्वप्राप्त्या ह्रस्वनिषेधार्थम् ओणृ धातोर्ऋकारोपादनं व्यर्थं सत् 'उपधाकार्यं द्वित्वात् प्रबलम्' इति ज्ञापयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

औज्जिजत् (ई० ७४)—'उज्ज आर्जवे उपदेशे दकरोपधः अयं धातुः । 'भुजन्युज्जौ पाण्युपतापयोः' इति सूत्रेण निपातनात् वकारः । तथाच 'उज्ज' धातोर्णिचि ण्यन्तस्य 'सनाद्यन्ताः' इत्यनेन धातुसंज्ञायां लुङि अजादित्वादाडागमे 'आटश्चे'ति वृद्धौ तिपि 'इतश्चे'तीकारलोपे औज्ज् इ त् इति स्थिते च्लौ तस्य 'णि–श्रि–द्रु–स्रु भ्य कर्तरि चङ्' इति चङि 'नन्द्राः संयोगादयः' इति निषेधात् 'चङि' इति जिशब्दस्य द्वित्वे 'औज्जि जि अ त्' इति स्थिते 'णेरनिटि' इति णिलोपे औज्जिजत् इति सिद्धम् ।

न च वत्वे कृते संयोगादौ दकाराभावात् कथं 'नन्द्राः' इत्यस्य प्रवृत्तिरिति वाच्यम्, द्वित्वे कर्तव्ये अन्तरङ्गोपि वकारादेशः 'नन्द्रा' इति निषेधस्तु जिशब्दस्य द्वित्वे कृते प्रवर्तते दकारोच्चारणसामर्थ्यात् ।

अबिभ्राजत्, अवभ्राजत् (ई० ७९)—भ्राजधातोः 'हेतुमति च' इति णिचि ण्यन्तस्य धातुत्वाल्लुङि अडागमे तिपि 'इतश्चे'तीकारलोपे च्लौ च्लेश्चङि 'भ्राजभास–' इत्यादिना विकल्पेन उपधाह्रस्वे 'अभ्यासे चर्च' इति भस्य वत्वे 'सन्वल्लघुनि–' इति सन्वद्भावे 'सन्यतः' इतीत्त्वे 'अबिभ्राजत्' इति । ह्रस्वाभावपक्षे 'अवभ्राजत्' इति सिद्ध्यति ।

असूषुपत् (ई० ८०)—स्वप् धातोः 'हेतुमति च' इति स्वार्थे णिचि वृद्धौ 'सनाद्यन्ता धातवः' इति धातुत्वे लुङि अटि तिपि 'इतश्चे'तीकारलोपे च्लौ चङि 'संप्रसारणं तदाश्रयं च कार्यं बलवत्' इति नियमात् पूर्वं स्वापेश्चङि इति सम्प्रसारणे पूर्वरूपे ततः 'चङीति द्वित्वे' अभ्यासत्वे हलादिः शेषे सन्वद्भावे अभ्यासस्य दीर्घे षत्वे असूषुपत् इति सिद्धम् ।

शाययति (ई० ७८)—'शो तनूकरणे' इत्यस्माद्धातोः 'आदेच उपदेशेऽशिति' इत्यात्वे हेतुमण्णौ 'शाच्छासाह्वाव्यावेषां युक्' इति युकि 'सनाद्यन्ताः' इति धातुत्वाल्लटि तिपि शपि गुणे अयादेशे शाययति इति सिद्धम् ।

अपीप्यत् (ई० ७७)—पाधातोः हेतुमण्णौ 'शाच्छासाह्वाव्यावेषां युक्' इति युकि 'पायि' इत्यस्य 'सनाद्यन्ताः–' इति धातुत्वाल्लुङि अडागमे तिपि इकारलोपे च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वेऽभ्यासत्वे हलादिः शेषे 'लोपः पितेच्चाभ्यासस्य' इति उपधालोपे अभ्यासस्य ईत्त्वे च कृते णिलोपे अपीप्यत् इति सिद्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ह्रेपयति (ई० ७३)—ह्री धातोर्णिचि वृद्धि बाधित्वा 'अतिह्रीब्लीरीवनूयीक्ष्माय्यातां पुङ् णौ' इति पुकि गुणे 'सनाद्यन्ताः' इति धातुत्वाल्लिटि तिपि शपि गुणे अयादेशे ह्रेपयति इति सिद्धम् ।

घातयति (ई० ७०)—हन्धातोः हेतुमण्णौ 'अत उपधायाः' इति वृद्धौ 'हनस्तोऽचिण्णलोः' इति हन्तेर्नकारस्य तकारादेशे ण्यन्तस्य धातुत्वाल्लटि तिपि शपि 'हो हन्तेः' इति हस्य कुत्वे गुणेऽयादेशे घातयति इति सिद्धम् ।

स्थापयति (ई० ७६)—स्थाधातोः हेतुमण्णौ 'अतिह्रीब्लीरीवनूयीक्ष्माय्यातां पुङ् णौ' इति पुकि ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणे अयादेशे स्थापयति इति सिद्धम् ।

अतिष्ठिपत् (ई० ८०)—'ष्ठा गतिनिवृत्तौ' इति धातोः 'धात्वादेः षः सः' इति पस्य सत्वे ष्टुत्वनिवृत्तौ 'स्था' इत्यस्मात् 'हेतुमति च' इति णिचि 'अतिह्रीब्लीरीवनूयीक्ष्माय्यातां पुङ् णौ' इति पुकि धातुत्वाल्लुङस्तिपि अटि अनुबन्धलोपे तिप इकारलोपे च कृते च्लौ 'णिश्रिद्रुस्रुभ्यः' इति च्लेश्चङि 'णिच्यच आदेशो न द्वित्वे' इति निषेधात् इत्वाऽपेक्षया पूर्वं द्वित्वे अभ्यासत्वे 'शर्पूर्वाः खयः' इति सलोपे अभ्यासह्रस्वे 'अभ्यासे चर्च' इति चर्त्वे 'अ त स्थाप इ अ त्' इति स्थिते 'णौ चङ्युपधाया ह्रस्वः' इत्युपधाह्रस्वे 'णेरनिटि' इति णिलोपे 'सन्वल्लघुनि चङ्परेऽनग्लोपे' इति सन्वद्भावे 'सन्यतः' इति ष्टुत्वे 'तिष्ठतेरित्' इतीत्वे 'अतिष्ठिपत्' इति सिद्धम् ।

ननु 'ओणृ अपनयने' इत्यत्र ऋदित्करणाल्लिङ्गात् 'उपधाकार्यं द्वित्वात् प्रबलम्' इति कल्पनेन पूर्वं 'तिष्ठतेरित्' इतीत्वं ततो द्वित्वं स्यादिति चेन्न, उक्तकल्पनायाः उपधाकार्यमात्रविषयकत्वात् । 'ओः पययोरि'ति वक्तव्ये पुयण्-जीति वचनाल्लिङ्गात् 'णिच्यच आदेशो न स्यात् द्वित्वे कर्तव्ये' इति कल्पनायास्तु यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याऽभ्योऽच् प्रक्रियायां परिनिष्ठते रूपे वा अवर्णो लभ्यते तन्मात्रविषयकत्वमिति विशेषेण सामान्यस्य बाधात् इति दिक् ।

अचीकृतत्-अचिकीर्तत् (ई० ७८)—कृत्वातोर्णिचि ण्यन्तत्य धातुत्वाल्लुङि तिपि अडागमे च्लौ 'णिश्रिद्रुस्रुभ्यः—' इति च्लेरङि 'अकृत् इ अ त्' इति स्थिते 'उर्कृत्' इति धातोरुपधाया ऋकारस्य ऋत्वे 'कृत' इत्यस्य द्वित्वे अभ्यासत्वे उरदत्त्वे हलादिःशेषे अभ्यासस्य चर्त्वे 'सन्वल्लघुनि—' इति सन्वद्भावात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

'सन्यत' इति इत्त्वे तस्य 'दीर्घो लघोः' इति दीर्घे अचीकृतत् इति। उपधाया ऋत्वाभावपक्षे 'उपधायाश्च' ति इत्त्वे रपरत्वे 'कितं्' इत्यस्य द्वित्वादिके कृते उत्तरखण्डे 'उपधायां च' इति दीर्घे अचिकीर्तत् इति सिद्धयति।

विलीनयति (ई० ७३)—विपूर्वकात् लीधातोर्णिचि ण्यन्तस्य धातुत्वाल्लटि तिपि 'लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने' इति नुकि गुणेऽयादेशे विलीनयति इति सिद्धम्। द्रवीकरोतीत्यर्थः।

तुगभावपक्षे तु—'विभाषा लीयतेः' इत्यनेन आत्वे ल्यपि च कृते 'विलाय' इत्यस्मात् णिचि ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणे अयादेशे 'विलाययति' इति।

विलालयति (ई० ५४)—लावातोर्णिचि 'लीलोर्नुग्लुकावन्यतरस्याम्—' इति लुगागमे ण्यन्ताल्लटि तिपि शपि गुणेऽयादेशे विलालयति इति सिद्धम्। लुगभावपक्षे 'अति ह्रीब्ली—' इति पुकि ण्यन्ताल्लटि तिपि गुणेऽयादेशे विलापयति इति सिद्धम्।

ननु कृतात्वस्य लावातोरपि एकदेशविकृतन्यायेन लीत्वान्नुक् स्यादिति वाच्यम्, सूत्रे 'ली ई' इति ईकारप्रश्लेषेण आत्त्वपक्षे तदप्राप्तेः।

जटाभिर्लापयते (ई० ७३)—लीधातोः 'हेतुमति चे' ति णिचि 'प्रलम्भनाऽभिभवपूजासु लियो नित्यमात्त्वमशिति वाच्यम्' इति वार्तिकेन एज्विषये नित्ये आत्वे पुकि लापीत्यस्य धातुसंज्ञायां लटि 'लियः सम्माननशालीनीकरणयोश्च' इति आत्मनेपदे तप्रत्यये टेरेत्त्वे शपि गुणे अयादेशे लापयते इति सिद्धम्। 'जटाभिर्लापयते' इत्यस्य पूजामधिगच्छतीत्यर्थः।

जापयति (ई० ७८)—'जी जये' अस्माण्णिचि वृद्धौ 'क्रीङ्जीनां णौ' इत्यनेन आत्वे पुकि 'ज पि' इत्यस्य 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लटि तिपि शपि गुणे अयादेशे जापयति इति सिद्धम्।

अध्यजीगपत् (ई० ७६)—अधिपूर्वादिङ्धातोर्णिचि धातुत्वात् तिपि अडागमे च्लेश्चङादेशे 'णौ च संश्चङोः' इति इङो गाङादेशे पुकि उपधाह्रस्वत्वे 'अधि अ गप् इ अ त्' इति स्थिते 'गप' इत्यस्य द्वित्वे अभ्याससंज्ञायां हलादिः शेषे 'कुहोश्चुः' इत्यनेन अभ्यासस्य चुत्वे सन्वद्भावे 'सन्यतः' इतीत्वे 'दीर्घो लघोः' इति दीर्घे यणि अध्यजीगपत् इति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न चात्र णिजिनमित्तस्य गाङो द्वित्वे कर्तव्ये स्थानिवद्भावस्तन्निषेधो वा स्यादिति वाच्यम्, यत्र अभ्यासोत्तरखण्डे आद्योऽज्वर्णोऽस्ति तत्रैव स्थानिवद्भावो, निषेधो वेत्युक्तत्वात्। इह तु गाङः पूर्वं द्वित्वे 'अजादेर्द्वितीयस्य' इति णिच एव यदि द्वित्वं स्यात्ततः चङ्परणिजिनमित्तो गाङ् ततश्च प्रक्रियायां परिनिष्ठितरूपे वा अवर्णवदुत्तरखण्डं दुर्लभं कीर्तयति साम्यात्।

अध्यापिपत्—अधिपूर्वादिङ्धातोर्णिचि सनाद्यन्तत्वेन धातुसंज्ञायां लुङि तिपि इपावितौ 'लुङ्–लङ्' इत्यडागमे च्लेश्चङादेशे 'णौ च संश्चङोः' इति विभाषया इङो गाङादेशाभावे 'अति–ह्री–ब्ली री–क्नूयी–क्ष्माय्यातां पुङ्–णौ' इति तुकि गाङादेशाभावे 'क्रीङ्जीनां णौ' इत्यात्त्वे पुकि 'अधि आ प् इ अ त्' इति स्थिते 'पि' इत्यस्य द्वित्वे अभ्याससंज्ञायां णिलोपे अध्यापिपत् इति सिद्धम्।

न चात्र गाङादेशपक्षे णिजिनमित्तस्य गाङो द्वित्वे कर्तव्ये स्थानिवद्भावो निषेधो वा स्यादिति वाच्यम्, अत्र अभ्यासोत्तरखण्डे यत्र आद्योऽज्वर्णोऽस्ति तत्रैव स्थानिवद्भावो निषेधो वेत्युक्तत्वात्। इह तु गाङः पूर्वं द्वित्वे 'अजादोद्वितीयस्य' इति णिचि एव द्वित्वं भवेत्तत्रश्चङ्परणिजिनमित्तो गाङ्, ततश्च प्रक्रियायां परिनिष्ठितरूपे वाऽवर्णस्तदुत्तरखण्डं दुर्लभं कीर्तयति-सम्यात्।

अन्तं साधयति (ई० ७७)—षिधृधातोर्णिचि 'धात्वादेः षः सः' इति सत्वे ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणे 'सिद्धयतेरपारलौकिके' इति एचः आत्त्वे णिचो गुणे अयादेशे साधयति इति सिद्धम्।

पालयति—'पा रक्षणे' इत्यस्माद्धातोः हेतुमण्णौ 'पातेर्णौ लुग्वक्तव्यः इति लुगागमे धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे पालयति इति सिद्धम्।

वाजयति (ई० ५७)—'ओ वै शोषणे' इति धातोः हेतुमण्णौ 'आदेच उपदेशे–' इत्यात्वे 'वो विधूनने जुक्' इति जुकि ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे वाजयति इति सिद्धम्।

रोपयति (ई० ६६)—रुहधातोः हेतुमण्णौ 'रुहः पोन्यरस्याम्' इति धातोः हस्य पकारादेशे लघूपधगुणे 'सनाद्यन्ताः–' इति धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे रोपयति इति सिद्धम्।

अररम्भत् (ई० ७०)—रभ्धातोः हेतुमण्णौ 'रभेरशब्लिटोः' इति नुमि ण्यन्तस्य धातुत्वाल्लुङि तिपि अडागमे च्लौ 'णिश्रि–' इति च्लेश्चङि द्वित्वे

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यासत्वे हलादिः शेषे णिलोपे तिप इकारलोपे अररम्भत् इति । अलघुत्वेन सन्वद्भावाऽभावादत्र दीर्घाभावः ।

ऐर्ष्ययत्-ऐर्षिष्यत् (ई० ६२)—ईर्ष्य् धातोः हेतुमण्णौ 'सनाद्यन्ताः—' इति धातुत्वाल्लुङि तिपि आटि वृद्धौ च्लौ च्लेश्चङि तिप इकारलोपे 'ऐर्ष्य् इ अ त्' इति स्थिते 'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' इति वार्तिकेन तृतीयव्यञ्जनस्य तृतीयैकाचश्च द्वित्वे तत्र तृतीयव्यञ्जनस्य द्वित्वपक्षे यकारसहितस्य 'यि' इत्येकाचो द्वित्वे णिलोपे 'ऐर्ष्ययत्' इति । तृतीयैकाचो द्वित्वपक्षे अत्र तृतीयैकाचोऽभावेन वार्तिकाप्रवृत्तौ 'आजादेर्द्वितीयस्य' इति 'ष्य' शब्दस्य द्वित्वे अभ्यासादिकार्ये च कृते 'ऐर्षिष्यत्' इति ।

वापयति (ई० ६६)—'वी गतिव्याप्तिप्रजनप्रकान्त्यसनखादनेषु' अस्माद्धातोः 'हेतुमति च' इति सूत्रेण णिचि अनुबन्धलोपे 'अचोञ्णिति' इति वृद्धौ 'वै इ' इति स्थिते 'प्रजने वीयतेः' इति सूत्रेण विभाषया आत्वे 'अतिह्रीब्ली-रीक्नूयीक्ष्माय्यातां पुङ् णौ' इत्यनेन पुगागमे अनुबन्धलोपे 'वापि' इति णिजन्तस्य 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि, शपि अनुबन्धलोपे 'सार्वधातु-कार्धधातुकयोः' इति गुणे अयादेशे वापयति इति । आत्वाऽभावे तु आयादेशे 'वाप्ययति' इति सिद्ध्यति । गावः वियन्ति (गर्भग्रहणं कुर्वन्ति) ताः पुरोवातः प्रेरयति इति—वापयति, वाययति वा गाः पुरोवातः । गर्भं ग्राहयतीत्यर्थः । पुरोवातकाले गावो गर्भं गृह्णन्तीति प्रसिद्धिः ।

प्राणिणत् (ई० ७९)—'प्र' इत्युपसर्गात् प्राणनार्थक—'अन्' धातोर्ण्यन्त 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लुङि तिपि इपावितौ 'आडजादीनाम्' इत्याटि 'आटश्च' इति वृद्धौ 'प्र आ नि त्' इति स्थिते च्लौ 'णि—श्रि—द्रु—स्रु भ्यः कर्तरि चङ्' इत्यनेन चङि णत्वस्याऽसिद्धत्वात् 'चङि' इति अजादेर्द्वितीय-स्येति द्वितीयैकाचः 'नि' शब्दस्य द्वित्वे 'णेरनिटि' इति णिलोपे सवर्णदीर्घे उत्तरखण्डे नकारस्याऽभ्यासनकारेण व्यवधानात् णत्वेऽप्राप्ते 'उभौ साभ्यासस्य' इति द्वयोर्नकारयोर्णत्वे प्राणिणत् इति सिद्धम् ।

न च 'पूर्वत्राऽसिद्धीयमद्विर्वचने' इति निषेधात् द्वित्वे कर्तव्ये णत्वस्याऽ-सिद्धत्वाभावेन परत्वाद् णत्वे कृते पश्चात् 'णि' शब्दस्य द्वित्वं कुतो नेति वाच्यम्, एतत्सूत्राऽऽरम्भसामर्थ्यात् तस्याः परिभाषाया अनित्यत्वज्ञापनात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अत एव 'ऊर्णुनाव' इत्यत्र णत्वात् पूर्वमेव 'नु' शब्दस्य द्वित्वे कृते अभ्यासोत्तरखण्डे णत्वाऽभावसिद्धिरिति दिक् ।

गमयति (ई० ६५)—इण्धातोर्णिचि 'णौ गमिरबोधने' इति इणः गमादेशे ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणे अयादेशे गमयति इति सिद्धम् ।

अधिगमयति (ई० ७४)—अधिपूर्वकात् इक्धातोर्णिचि 'इण्वदिकः' इति गमादेशे ण्यन्तस्य धातुत्वाल्लटि तिपि शपि गुणेऽयादेशे इति सिद्धम् ।

विस्मापयन् विस्मितमात्मवृत्तौ (ई० ७८)—'विस्मापयन् विस्मितमात्मवृत्तौ' इत्यत्र मनुष्यवाचेति करणेनैव राज्ञो विस्मये सिंहरूपप्रयोजकाद्विस्मयाभावेन 'नित्यं स्मयतेः' इति सूत्राप्रवृत्तौ आत्वाभावेन यग् न स्यात् । यदि प्रयोजकद्विस्मयः स्विक्रयते तदा 'भीस्म्योर्हेतुभये' इत्यात्मनेपदमपि स्यात् । तथाच शतृप्रत्यययुक्तं रूपमनुपपन्नं भवतीति सन्देहे 'विस्माययन्' इत्येव पाठ इति साम्प्रदायिकाः ।

अथवा राजा विस्मयते, मनुष्यवाक् प्रेरयतीति मनुष्यवाक् राजानं विस्मापयते इति तां मनुष्यवाचं सिंहः प्रेरयति तया राजानं विस्मापयन्निति ण्यन्ताण्णौ मनुष्यवाक्रूपप्रयोजकाद्विस्मयो विद्यत इत्यात्वादिकार्ये रूपं सुलभमिति दिक् ।

अथवा राजा विस्मयते, मनुष्यवाक् प्रेरयतीति मनुष्यवाक् राजानं विस्मापयते इति तां मनुष्यवाचं सिंहः प्रेरयतीति सिंहः तया राजानं विस्मापयन्निति ण्यन्ताण्णौ मनुष्यवाक्रूपप्रयोजकाद्विस्मयो विद्यत इत्यात्वादिकार्ये रूपं सुलभमिति दिक् ।

दूषयति (ई० ७३)—देवदत्तो दुष्यति तं कञ्चित् प्रेरयति, इत्यार्थे 'हेतुमति च' इति सूत्रेण 'दुष वैकृत्ये' अस्माद्धितोर्णिचि अनुबन्धलोपे दुष् इ इति स्थिते णिच आर्धधातुकत्वात्तस्मिन् दकारादुकारस्य 'पुगन्तलघूपधस्य च' सूत्रेण प्राप्तं लघूपधगुणं प्रबाध्य 'दोषो णौ' इति सूत्रेण ऊत्वे 'सनाद्यन्ता धातवः' इति 'दूषि' इति णिजन्तस्य धातुसंज्ञायां लटि तिपि शपि अनुबन्धलोपे 'दूषि अ ति' इति स्थिते 'सार्वधातुकार्धधातुकयोः' इति गुणे अयादेशे 'दूषयति' इति सिद्धम् ।

चित्तविरागे तु (ई० ७४)—चित्तं दुष्यति-स्नानसन्ध्यादौ विरक्तं भवति, तत्प्रयोजयति कामः इत्यर्थे णिचि 'वा चित्तविरागे' इति सूत्रेण लघूपधगुणं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu